M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 762

Title: Itihas Samuchchaya

762

762

इतिहाससमुच्चय

Incomplete

	Itahāsa Samuchchaya	:	Title
:	:	:	Author
:	:	:	Editor
:	:	:	Year. Vols.
:	:	:	Publisher
762 :	: Endo abonpoter	:	Remarks

॥श्रीगणेशायनमः॥ ॥जनमेजयउवाच॥ ॥निवृत्तेभारतेयुद्धेकिंचकारयुधिष्ठिरः॥कथयस्वसमासे
नवैशंपायनसुव्रत॥ ॥वैशंपायनउवाच॥जयतिभगवान्कविऋषभःसत्यवतीहृदयनंदनोव्यासः॥यस्या
स्यकमलगलितंवाङ्मयममृतंजगत्पिबति॥पाराशर्यवचःसरोजममलंगीतार्थगंधोत्कटंनानाख्यानकके
सरंहरिकथासंबोधनाबोधितं॥लोकेसज्जनषट्पदैरहरहःपेपीयमानंमुदाभूयाद्भारतपंकजंकलिमलप्रध्वं
सिनःश्रेयसे॥कृष्णद्वैपायनंव्यासंविद्धिनारायणंप्रभुं॥कोह्यन्यःपुंडरीकाक्षान्महाभारतकृद्भवेत्॥मति
मंथानमाविश्ययेनवेदार्णवात्मध्यतः॥जगद्धितायजनितौमहाभारतचंद्रमाः॥प्रायशोमुनयःसर्वेकेवला
त्महितेरताः॥द्वैपायनस्तुभगवान्सर्वभूतहितेरतः॥स्वत्यंलोकेह्यास्तिकिंवान्यधनलोकाहितैषिणा॥वेदाव्य
स्ताःकृतंचापिमहाभारतमुत्तमं॥सर्वस्तरतुदुर्गाणिसर्वोभद्राणिपश्यतु॥इत्युक्त्वासर्ववेदार्थाभारतेयेनद
र्शिताः॥समस्तांश्चापितानर्थांस्तत्रस्थान्दर्शयिदृष्यतः॥श्रूयतांहिंसिनादोपमपेस्तस्यमहात्मनः॥धर्मेचा

श्री १
॥२॥

६

र्थेचकामेचमोक्षेचभरतर्षभ॥यदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित्॥एषप्रकृत्यैवहितोलोकस्तत्त्वो
र्थकामयोः॥धर्ममोक्षपरंयस्मात्कारिष्येहंसमुच्चयं॥कामिनोवर्णयन्कामान्लोभंलुब्धस्यवर्णयन्॥
नरःकिंफलमाप्नोतिकूपेंधमिवपातयन्॥मुनिनापिचकामार्थौक्तित्वालोकमनोहरौ॥नित्यावपिश्रितावे
तौधर्ममोक्षविवक्षया॥अन्यथाघोरसंसारेबंधहेतुर्जनस्यतो॥वर्णयेत्कथमुद्योगंमहाकारुणिको
मुनिः॥लोकचित्तावसानार्थंवर्णयित्वाचतेनतौ॥इतिहासेविविचित्रार्थैःपुनरत्रैवगर्हितौ॥भारतंभा
नुमानिंदुर्यदिनस्युरमीत्रयः॥ततोज्ञानतमोंधस्यकावस्थाजगतोभवेत्॥भारताध्ययनान्नित्यमपिपा
दमधीयतः॥श्रद्धयानस्यसर्वेतसर्वपापान्यशेषतः॥योगोशतंकनकशृंगमयंददातिविप्रायवेदविदु
षेचबहुश्रुताय॥पुण्यांचभारतकथांशृणोतितुल्यंफलंभवतितस्यचतस्यचैव॥भारतस्यक
पादेनगंगायादर्शनेनच॥विष्णोःस्मरणमात्रेणसर्वपापैःप्रमुच्यते॥एतच्छ्रुत्वातुमुनिभिर्निःसंश

नश्ये २

इ.स.
२

द्धा समन्वितैः॥ अध्येयो भारतीयोयमितिहाससमुच्चयः॥ श्लोकायेभारतेचास्मिन् कचित्केचित्व्यवस्थि
ताः॥ तुल्यार्थौविहितान्सर्वान्योजयिष्येतुतानहं॥ सारश्लोकान्समुद्धृत्य कः कुर्याद्भारतात्क्षमः॥ योगतःस
र्वरत्नानिसमुद्धर्तुंमहार्णवात्॥ नचप्रज्ञाभिमानेनमयायंकर्तुमुद्यतः॥ किंतुभारतभक्तिर्मांविवशांसम
चूचुदत्॥ तन्महाभारतंप्रीतिःपराधीनांतरात्मनः॥ क्षंतव्यंसज्जनैरेवममयोग्यक्रियादरः॥ अन्विष्यं
श्चेतिहासानामत्रसाङ्गैरनुक्रमः॥ यथार्थनामधेयोयमितिहाससमुच्चयः॥ द्वात्रिंशदितिहासाना
मितिहाससमुच्चयः॥ क्रियतेघोरसंसारनिर्मोक्षस्यैवसाधनः॥ एवंसेनजिदाख्यानंगौतम्याख्यानंत
रं॥ तृतीयंमु[illegible]ख्यानंऔ[illegible]नरमतःपरं॥ ततश्चगंगामाहात्म्यंसकृत्प्रस्थीयमेव च॥ सुदर्शनस्य
चाख्यानंसप्तमंपरिचक्षते॥ स्वर्गनरकमाख्यानंकपोतास्यानमेव च॥ दुर्गतीतरणंनामदशमंपरिकी
र्तितं॥ सप्तर्षीणां चसंवादंएकादशमितिस्मृतं॥ लोभाख्यानंततःप्रोक्तं आंजल्याख्यानमेव च॥ कुंडधा

ख्या २

श्री ४
२

रस्य चाख्यानंचतुर्दशमुदाहृतं॥ मंकीगीतस्य चाख्यानंबोध्यगीतमतःपरं॥ इंद्रकश्यपसंवादंसप्तदश
मुदाहृतं॥ पितापुत्रस्यसंवादंशुकशासनमेव च॥ विंशंकंभूमिदानंचगोदानंचततःपरं॥ अन्नदानंमहा
पुण्यंद्वाविंशकमथोच्यते॥ तिलदानंततश्चैवनृगस्याख्यानमेव च॥ च्यवनस्य च संवादंनहुषस्यमहा
त्मनः॥ मानसीतीर्थयात्रा चषड्विंशकमुदाहृतं॥ अर्हत्वाब्रह्महत्या चसप्तविंशकमेव च॥ अष्टाविंशकमा
हात्म्यंविषमेमांसभक्षणे॥ ततश्चनकुलाख्यानंबकुलाख्यानमेव च॥ सुव्रतायाश्चसंवादंसिद्धस्य चमहा
त्मनः॥ पुंडरीकस्यसंवादंमहर्षेर्नारदस्य च॥ अत्रैवानुक्रमोज्ञेयोनाममहाभारतेबुधैः॥ एवंद्वात्रिंशदाख्या
नंइतिहाससमुच्चयं॥ ॥ इतिश्रीइतिहाससमुच्चयेअनुक्रमणिकाध्यायः॥ ॥जनमेजयउवाच॥
जलप्रदानेसुहृदां कृत्वातेपांडुनंदनाः॥ नारायणश्चविप्रर्षे किमकुर्वन्नतःपरं॥ ॥वैशंपायनउवाच॥ श
तोकंतुराजानंधर्मपुत्रंयुधिष्ठिरं॥ पुण्येभागीरथीतीरेसमुपविष्टंसबांधवं॥ निश्वसंतंमुहुर्दीनम

द्रुती०
३

श्रद्धन मातुरं॥ अभिजग्मुर्महात्मानः पुण्या ब्रह्मर्षिसत्तमाः॥ नारदो देवलो व्यासः कवः कण्वोथ कश्यपः
॥ रैभ्यो बृहस्पतिर्धौम्यो गालवश्च्यवनो भृगुः॥ वासिष्ठो जमदग्निश्च दुर्वासा लोमशस्तथा॥ अन्येच
बहवः सिद्धाः सशिष्याश्च महाव्रताः॥ तान्प्रणम्य यथान्यायं सर्वैस्तैश्चापि नंदितः॥ प्रोवाच देवं वचोरा
जा बाष्पव्याकुललोचनः॥ ॥युधिष्ठिर उवाच॥ घातयित्वा प्रियान्बंधून्पुत्रान्पौत्रान्पितृंस्तथा॥ जयो
यमजयाकारो मुनयः प्रतिभाति मे॥ अभिमन्योस्ते बाले द्रौपद्यास्तथैव पुत्र॥ तथान्येषु नरेंद्रेषु सु न
हृत्संबंधिबंधुषु॥ न विमुंचति मां शोको ज्ञातिघातिनमातुरं॥ राज्यकामुक मत्स्याग्रं स्ववंशोच्छेदकार
णं॥ यस्यां केक्रीडितो नित्यं बाल्ये च परिवर्द्धितः॥ समया राज्यलोभेन गांगेयो युधि घातितः॥ येन संव
र्द्धितो बाल्ये येनास्मि परिपालितः॥ अल्पकस्य च राज्यस्य कृते सो घातितो गुरुः॥ तन्मे दहति गांगा
नियन्मां गुरुरभाषत॥ सत्यं कथय राजेंद्र यदि जीवति मे सुतः॥ समया तं नृशंसेन पापेन गुरुघाति श्री४ ३

स्य०

सु
ना॥ सत्यं कंचुकमुत्सृज्य व्याजेन धर्षितो युधि॥ अश्वत्थामा हतः सत्यमिक्तः कुंजरे हते॥ कांस्त्वलोकान्
गमिष्यामि कृत्वा कर्म सुदुष्करं॥ अघातयं च पत्कर्णं सर्वशस्त्रभृतां वरं॥ ज्येष्ठं भ्रातरमुत्सृज्य ग्रं को मत्तः पाप
कृत्तमः॥ अभिमन्युं पराबालं सुतं सिंहमिवाद्रिषु॥ प्राविशयम हेतुर्वो वाहिनीं द्रोणपालितां॥ तदाप्रभृति
बीभत्सुं न शक्नोम्यपि वीक्षितुं॥ कृष्णं चे पुंडरीकाक्षं किल्बिषी भ्रूणहा यथा॥ द्रौपदीं च प्रियैः पुत्रैः पंचभि
र्विप्रयोजितां॥ दुःखादुःखतरं प्राप्तं दृष्ट्वा मे दह्यते मनः॥ सोहमेतत्करः पापः पृथ्वीनाशकारकः॥ शोषयि
ष्ये प्रियान्प्राणान्निःसत्वो मुनिसत्तमा॥ सर्वमामनुजानी ध्वं त्यक्ष्यामीदं कलेवरं॥ ज्ञातिष्वन्येषु च यथा न
भविष्य कुलांतकृत्॥ तमेवं वादिनं दीनं बहुशोकन विह्वलं॥ परावरज्ञो भूतानां व्यासो वचनमब्रवी
त्॥ ॥व्यास उवाच॥ ॥मा कृथाः पुरुषव्याघ्र शोकं त्वं गाढशोषणं॥ नाहं त्वं खलु भीभ्रया ये हतास्सम
राजिर॥ व्यसनेषु न शोचंति नहृष्यंत्युदयेषु च॥ कृतप्रज्ञा ज्ञानवंतः स्वाद्विधाः पांडुनंदन॥ यं स्यंत

यदि शोकेन त्वादृशोपि विपश्चितः॥ ततः शास्त्रविपश्चित्वं श्रमायैव हि केवलं॥ शोकस्थान सहस्राणि
भयस्थान शतानि च॥ दिवसे दिवसे मूढमाविशंति न पंडितं॥ जातस्य हि ध्रुवो मृत्यु ध्रुवं जन्म मृतस्य
च॥ तस्मादपरिहारार्थे न त्वं शोचितुमर्हसि॥ अवश्यंभाविनो ह्यर्थाः स्वकर्मफलहेतवः॥ तान्न संतो हि
शोचंति शास्त्रतत्वार्थवेदिनः॥ मृतं वा [illegible] यदि वा नष्टं योतीतमनुशोचति॥ दुःखेन दुःखमाप्नोति द्वा
वनर्थौ प्रपद्यते॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं॥ एतद्योनीनि भूतानि तत्र का परिवेदना॥
न स कश्चिदुपायोस्ति दैवो वा मानुषोपि वा॥ येन मृत्युवशं प्राप्तो जंतुः पुनरिहाव्रजेत्॥ बांधवैः पुत्रदा
रैश्च विमुक्तस्य धनेन वा॥ मग्नस्य व्यसने घोरे धृतिः पार्थ परायणं॥ श्रुतं धर्मं बलं धैर्यं सुखमुत्सा
हमेव च॥ सर्वमेतत् कुरुश्रेष्ठ शोको दहति देहिनां॥ बाल्यं च यौवनस्थं च वृद्धत्वं भोगतां गतान्॥ सर्वा
नाविशते मृत्यु एवं भूतमिदं जगत्॥ एवं भूतेषु भूतेषु सर्वावस्थाविनाशिषु॥ कोनु हृष्येत जातेषु शो

कं कुर्यान्मृतेषु च॥ नातीतमनुशोचंति नष्टं कुर्वंति नस्पृहां॥ वर्तमानेन मज्जंति शोकेन त्वाविदो जनाः॥
क धाता कः क्व महीपालाः क्व ते कपालाः वपुर्धराः॥ त्यज शोकमिमं तस्मान्महामोहसमुद्भवं॥ अत्रैवोदाह
रंतीममितिहासं पुरातनं॥ यथाश्वसेनाज्जितं कश्चिद्ज्ञानवान्ब्राह्मणोब्रवीत्॥ पुत्रशोकाभिसंतप्तं रा
जानं दीनमानसं॥ विषण्णवदनं दृष्ट्वा विप्रः प्रोवाच धर्मवित्॥ ॥ब्राह्मण उवाच॥ ॥किंनु मुह्यसि
मूढ स्वमशोच्यः किंनु शोचसि॥ यदि त्वामनुशोचंतं त्वं शोचिष्यंति परे जनाः॥ तथाहं च यथा चैते त्वां
राजन्पर्युपासते॥ सर्वे एव मरिष्यामः तत्र का परिवेदना॥ अदर्शनादिहायातः पुनश्चादर्शनं ग
तः॥ नासौ तव न तस्य त्वं वृथा किमनुशोचसि॥ नायमत्यंतसंवासः कस्यचित्केनचित्सदा॥ अपि
स्वेन शरीरेण किमुतान्यैः पृथग्जनैः॥ जनेनासौ जनो जातो जनस्त्वं जनितो जनात्॥ जनं शोचसि ना
त्मानं आत्मानं शोच मा जनं॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत॥ अव्यक्तनिधनान्येव तत्र

इ.स.
५

कापरिवेदना॥ क्वनुतेघपिता राजन्क्वचतेघपितामहः॥ नत्वंपश्यसितानद्य नत्वांपश्यंतितेपिच॥ ए
वंपुत्राश्चपौत्राश्च ज्ञातयोबांधवास्तथा॥ तेषुस्नेहोनकर्तव्योविप्रयोगश्चतेध्रुवं॥ संयोगोविप्रयो
गश्चजनानांप्राणिनांध्रुवं॥ बुद्बुदाइवतोयेषुभवंतिनभवंतिच॥ यस्ययोगोबहुमतोवियोगःकथम
प्रियः॥ यत्रयोगोवियोगोनग्रस्तस्तत्रोपजायते॥ सर्वेक्षयांतानिचयाःपतनांताःसमुच्छ्रयः॥ संयोग
विप्रयोगांताःमरणांतंहिजीवितं॥ अनित्यंयौवनंरूपमायुष्यंद्रव्यसंचयः॥ आरोग्यंप्रियसंवासो
गृध्यंतेहिनपंडिताः॥ पंडितेचैवमूर्खेचबलवत्यबलेतथा॥ ईश्वरेचदरिद्रेचमृत्योःसर्वत्रतुल्यता॥
तुल्यकालप्रसूतस्यसहस्रस्यापिपार्थिव॥ नराःशतायुषाःपुंचभवंतिनभवंतिच॥ सर्वशास्त्रप्र
शमनीसर्वोपायविनाशिनी॥ अप्रमत्ताप्रमत्तानांनृणांकालोगतिनित्यता॥ अतश्चसर्वमेवेदम
नित्यंयोवमन्यते॥ सोनित्यतांकृतमतिर्म्लानमानोनशोचति॥ संगतानिसुबद्धानिविषयांश्च

श्री४
५

मनोरमान्च॥ छित्वानसेकपदेमृत्युर्वैराणीवमनस्विनां॥ अहो२मर्त्येषुलोकेजरारूपेणसंचरन्च॥ मृत्यु
गरुडः
र्ग्रसतिभूतानिखगेंद्रःपन्नगानिव॥ यथाहिपांथिगःकश्चिच्छायामाश्रित्यविश्रमेत॥ विश्रम्यचपुनर्गच्छे
त्तद्वद्भूतसमागमः॥ समागमःसापगमःसर्वमुत्पादिभंगुरं॥ कायःसन्निहितापायःसंपदःपदमापदां
संपदोहिमनुष्याणांगंधर्वनगरोपमाः॥ दृश्यमानाःक्षणेनैवभवंतिनभवंतिहि॥ भैषज्यमेतद्दुःखस्य
यदेतन्नानुचिंतयेत्॥ चिंत्यमानंनचाप्येतिभूयश्चापिविवर्द्धते॥ अतीतंनानुशोचंतिकुर्वंतिनमनोरथं॥
नोद्विघंतेनहृष्यंतेहगाधाःपंडितास्तदा॥ अज्ञानप्रभवःशोकःशरीरपरिशोषणः॥ तस्मात्त्वंपुरुष
व्याघ्रत्यजेमंराजसत्तम॥ ॥व्यासउवाच॥ ॥इत्येवंश्येनजित्प्राज्ञोद्विजेनप्रतिबोधितः॥ पुत्रशो
कंपरित्यज्यबभूवस्वस्थमानसः॥ तस्मात्त्वमपिराजेंद्रप्रज्ञामास्थायसात्त्विकीं॥ ज्ञातिशोकमि
मंत्यक्त्वाभुंक्ष्वराज्यमकंटकं॥ ॥इतिश्रीइतिहाससमुच्चयेश्येनजिदाख्यानंनामप्रथमोध्यायः॥

प्रदह्याम्यनिशंतातचिंतयानः पुनःपुनः हीनां पार्थिवसिंहैस्तैः श्रीमद्भिः पृथिवीमिमां॥ कान्नु तासां वरस्त्रीणां अवस्थाद्य भविष्यति ५

इति ६ ॥ ॥वैशंपायन उवाच॥ ॥एवं बहुविधप्रोक्तः कृष्णद्वैपायनेन सः॥ शोकदुःखपरीतात्मा प्रत्युवाच
युधिष्ठिरः॥ ॥युधिष्ठिर उवाच॥ ॥अहन्त्वश्रद्दधे ब्रह्मन्सर्वं तथ्यं वचस्तव॥ किंतु ज्ञातिवधोद्भूतः शोको मां
बाधते बलात्॥ प्रियाः पुत्राश्च पौत्राश्चापितरोथापितामहाः॥ श्वशुरा भ्रातरश्चान्ये ज्ञातयो बांधवास्त
था॥ अन्ये च पृथिवीपालाः नानादेससमागताः॥ घातिता राज्यलुब्धेन मयोग्रेणापितामहाः॥ नृपतींस्ता
त्रणे हत्वा धर्मयुक्तान्महीक्षितः॥ यज्वानः क्रतुमुख्यानां कांगमिष्याम्यहंतिगं॥ याहीनापतिभिः पु
त्रैः पितृभिर्भ्रातृभिस्तथा॥ कौरवीणामिवार्तानां क्रंदंतीनां महर्निशं॥ निशाम्यार्तिस्थिनं तासां को नु जी
वितुमुत्सहेत्॥ तमिदं क्रूरकर्माणं ज्ञातिबांधवघातिनं॥ त्रैलोक्यराज्यलाभेपि न मामद्य प्रहर्षये
त्॥ ॥वैशंपायन उवाच॥ तमेवं शोकदुःखार्तं विद्धक्लं तं महीपतिं॥ कृपयापरयाविष्टो व्यासः
पुनरभाषत॥ ॥व्यास उवाच॥ ॥नानैवं कं महाराज त्वं शोकं कर्तुमर्हसि॥ पुनरुक्तं प्रवक्ष्यामि ६

दिष्टमेतदितिप्रभो॥ स्वप्नलब्धायथालाभावितथाप्रतिबोधने॥ एवं ते पार्थिवा राजन्ये हता नात्र णा
जिरे॥ पृथिव्यावासकलया सुवर्णस्य च राशिभिः॥ राजानस्ते ज्ययज्ञैश्च मित्रेनेलभंतेन्नृपो नमाः॥ नतेषां
वापिहंता त्वं नभीमो नार्जुनस्तथा॥ स्वकर्मविधियुक्तेन नृपाः कालेन ते हताः॥ हेतुमात्रं भवं नोरितस्य
कालस्य पार्थिव॥ पुष्यंति भूतैर्भूतानि रूपं तस्य न देश्वरं॥ गानिम्रत्यात्मकं विद्धि ज्ञातारं शुभपापयोः
सुखदुःखगुणोदर्कं कालं कर्मफलप्रदं॥ यस्य नास्ति प्रियः कश्चित्र नद्वेष्यश्चापि पार्थिव॥ कर्मसा
क्षी प्रजानाथः तेन कालेन ते हताः॥ तेषामपि च राजेंद्र कर्माणि परिचिंतय॥ विनाशहेतुकानित्वं येन
मृत्युवशंगताः॥ आत्मनश्च विजानीहि नियतव्रत साद्दृशं॥ कि मदुःखलं यथापित्वं विधिना कर्मकारि
ताः॥ किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः॥ प्रायेण हि मनुष्याणां बुद्धिः कर्मानुसारिणी॥ सोयं
मज्जं कुमारिदं गंभीरे कालसागरे॥ मत्स्यरोगजराव्याधिनक्रश्चिद्वबुध्यते॥ आपाको भूतभावानांथा

शां.
७

त्रांशेनाविनिर्मितः॥स्वकर्मघनसंघातेपच्यतेकालवह्निना॥बीजंपिताक्षेत्रमपीजनित्रीसृष्टिश्च कर्माणि
शुभाशुभानि॥कृतानिसस्यप्रतिमानिलोके ज्ञानानिजातानिलुनातिकालः॥तस्मात्कालरतंज्ञात्वा
त्वमिमंपृथिवीक्षयं॥ज्ञातिबंधुवधोद्भूतंत्यजशोकंनरेश्वर॥ ॥श्रीकृष्णउवाच॥ ॥ऋषिरेषत्रिका
लज्ञोभवनांचहितेरतः॥यदाहभगवान्व्यासस्तत्कुरुष्वनृपोत्तम॥शोकमोहग्रहग्रस्तोग्रीष्ठिरंशोनं
स्वबुद्धयः॥महांतस्त्वमहाराजेन्क्षणंशोचितिवानवा॥ ॥वैशंपायनउवाच॥एवंतदानुनीतोसौरा
जाद्वैपायनादिभिः॥कृष्णेनसहितःसर्वैःसमस्तैर्भ्रातृभिःसह॥सर्वैःपरिवृतःश्रीमान्ग्रहैरिवनि
शाकरः॥दुःखेनाहिसमाविष्टेजगामाथपितामहं॥ ॥ ॥इतिश्रीइतिहाससमुच्चयेयुधिष्ठिरशोका
पनोनामप्रथमोध्यायः॥ ॥जनमेजयउवाच॥ ॥गांगेयस्यसमीपस्थोभ्रातृभिःपरिवा
रितः॥एतदाख्याहिमेविप्रकिंचकारयुधिष्ठिरः॥ ॥वैशंपायनउवाच॥ ॥शास्त्रोव्यासेनरा

श्री४
७

याम
जेंद्रकृष्णेनचमहात्मना॥ज्ञातिशोकपरीतात्माभीष्मंपुनरभाषत॥ ॥युधिष्ठिरउवाच॥शमोब
हुविधाकारोव्यासेनोक्तःपितामह॥नचमेस्तिमनःशांतिःपापंकृत्वासुदारुणं॥अहंतवाप्यंतकरो
ज्ञातिक्षयकरोप्यहं॥नशांतिमनुगच्छामिकृत्वाकर्मसुदुष्करं॥रुधिरेणप्रलिप्तांगंप्रस्रवंतंयथा
चलं॥त्वांदृष्ट्वाशरतल्पस्थंसिंहंवर्षास्विवांबुदं॥देवव्रतंमहात्मानंसत्यधर्मपरायणं॥हत्वाप्र
वंतंलोकेनभेत्स्येशोकान्प्राप्स्यामिकानहं॥यथास्माकंमहाघोरान्मुच्येहंकिल्बिषाद्यथा॥तथाप्रशा
धिमांराजन्ममचेदिच्छसिप्रियं॥ ॥भीष्मउवाच॥ ॥परंतत्रक्षयेहेतुमात्मानंबाहिमन्यसे॥कर्म
ण्यस्मिन्महाराजसूक्ष्मंह्येतदतींद्रियं॥मनःकर्ममयंप्राहुःसर्वप्राणभृतांबुधः॥तत्तथाचैष्टतेत
स्वाभाविकंसेफलंयथा॥यद्यज्ञाविनतज्ज्ञाविपद्ज्ञाविनतदन्यथा॥इतिचिंतविषघ्नायसंवादकि
त्रपीयते॥अत्रैवोदाहरंतीमंइतिहासंपुरातनं॥संवादंमृत्युगौतम्योःकालंलुब्धकपन्नगैः॥अत्रा

इति ८

ह्मणीगोतमीपूर्वंरुद्धाविराश्रमकेस्थिता॥सर्पेणदष्टंस्वंपुत्रमपश्यन्नष्टचेतना॥अथतस्नायुपाशेनब
द्ध्वासर्पममर्षितः॥लुब्धकोर्जुनकोनामगोतमीसमुपागमत्॥तांचाब्रवीदयंतेसौपुत्रहापन्नगाधमः॥
ब्रूहिक्षीघ्रंमहाभागेवध्यतांकेनहेतुना॥ ॥ब्राह्मण्युवाच॥ ॥नास्मिन्हतेपन्नगेपुत्रकोमेप्राप्स्यत्य
यंजीवितंवैकथंचित्॥गुणंचान्यन्नास्यवधेऽद्यपेमितस्मात्सर्पंलुब्धकमुंचशीघ्रं॥व्याधिरग्निर्वि
षंशस्त्रंक्षुत्सर्पःपशवोमृगाः॥निर्वाणायस्यचादिष्टंतेनगच्छंतिजंतवः॥पापेनप्रतिपापंस्यात्
साधुरेवसमाचरेत्॥आत्मनैवहतःपापोयःपापंहर्तुमिच्छति॥दग्धंहिंसानुदहतिहतमेवानुहं
ति च॥मृतंमारयतेनैवयःपापोपापमाचरेत्॥महामोहहतंएवंयोजंतुंहंतुमिच्छति॥सपापोनरकं
यातिनृशंसोनृतघातकः॥ ॥लुब्धकउवाच॥ ॥नपापानांवधेपापंविद्यतेकिलशोभने॥तस्मा
त्तस्मादेनंवधिष्यामिनृशंसंशिशुघातकं॥ ॥गोतम्युवाच॥ ॥सुलभापुरुषाल्लोकेसाधवःसा

श्री ८

क्रोधमानापिगोतमीलुब्धंप्रति॥लुब्धकेनमहाभागासापापेनाकरोन्मतिं ४

धुकारिणः॥असाधुषुपुनःसाधुर्दुर्लभःपुरुषोमतः॥तेसाधवःसुजन्मानस्तेरियंत्रपितावरः॥अपकारि
षुचैतेषुयेभवंत्युपकारिणः॥दुःखितेभ्योहिसततंव्याधिरोगजरादिभिः॥भयःकोदुःखमपरंसुघृतोदा
तुमिच्छति॥दुःखंददातियोन्यस्यध्रुवंदुःखंसविंदति॥तस्मान्नकस्यचिद्दुःखंदातव्यंभयभीरुणा॥सुम
हत्यपिदोषेतुकृतेयत्नभवेदिह॥कथंचिच्छिद्यतेजंतुर्यन्त्रभयःप्ररोहति॥ ॥भीष्मउवाच॥ ॥असकृ
द्बोधमानोपिपापेषुअक्षात्मानप्रवर्तते॥वार्यमाणोपिपापेभ्यःपापात्मापापमाचरेत्॥विद्वद्भिःशा
स्यमानोपिपापकर्मरतिर्नरः॥धर्ष्यमाणइवांगारोनिर्मलत्वंनगच्छति॥जन्मांतरसहस्रेषुयाबु
द्धिर्भाविताषुरा॥तामेवलभतेजंतुरुपदेशोनिरर्थकः॥ततःसमुच्छ्वसंदीनःकष्टात्संस्तभ्यपन्नगः॥
उत्ससर्जगिरंमंदांमानुषीपाशपीडितः॥ ॥सर्पउवाच॥ ॥कोन्वर्जुनकदोषोत्रविद्यतेममबालि
श॥अस्वतंत्रंहिमांमृत्युर्विवशंसमचूचुदत्॥तस्यायंवचनाद्दष्टोनरोषेणनकाम्यया॥तस्मात्तस्ये

इति.

वतस्यापंपापंममनविद्यते॥ ॥भीष्मउवाच॥ ॥तथाब्रुवानितस्मिंस्तुभुजगेदैववादिते॥आजगामततोमृ
त्युःपन्नगंचेदमब्रवीत्॥ ॥मृत्युरुवाच॥ ॥कालेनचोदितश्चाहंपन्नगत्वामचूचुदंच॥विनाशहेतुःकालो
स्यशिशोर्नाहंनचापन्नगः॥जंगमस्थावराश्चैवदिविवायदिवाभुवि॥सर्वेकालवशंयांतिकालात्म
कमिदंजगत्॥अनादिनिधनोयोसौजगतःकारणंपरं॥लोकेशःकालरूपश्चतिकस्त्वपकमिवाहितं॥न
मंत्रंनतपोदानंनमंत्राणिनबांधवाः॥शक्नुवंतिपरित्रातुंनरंकालेनपीडितुं॥त्रयःकालकृतांपा
शान्नशक्यंतेविवर्तितुं॥विवाहोजन्ममरणंयदायस्यचयेनच॥यथाजलंधराव्योम्निभ्राम्यतेमा
तरिश्वना॥तथेदंकर्मयुक्तेनकालेनभ्राम्यतेजगत्॥अथाधिगम्यकालस्तुतस्मिन्धर्मार्थसंश
ये॥अब्रवीत्पन्नगंमृत्युंतथाचार्जुनकंलुब्धकं॥ ॥कालउवाच॥ ॥नचाप्यहंतथामृत्युर्नैमौलुब्ध
कपन्नगौ॥हेतवोजन्ममरणेनैवास्यप्रयोजकाः॥यदनेनकृतंकर्मतदेवास्यप्रयोजकं॥विना

श्री॥

शहेतुःकर्मास्यसर्वेकर्मवशावयं॥कर्मदायस्वाल्लोकःकर्मसंबंधिबांधवाः॥कर्माणिचोदयंतीहपुरुषंसुख
दुःखयोः॥सुवर्णंरजतंवापियथारूपंनिगद्यते॥तथानिगद्यतेजंतुःपूर्वकर्मवशानुगः॥पंचैतानिहिसृ
ज्यंतेगर्भस्थस्यैवदेहिनः॥आयुःकर्मचवित्तंचविद्यानिधनमेवच॥यथामृत्पिंडकंकर्ताकुरुतेयद्यदि
च्छति॥तथापूर्वकृतंकर्मकर्तारमनुगच्छति॥देवत्वंमानुषत्वंचपशुत्वंपक्षितांतथा॥तिर्यक्त्वंस्थाव
रत्वंचयातिजंतुःस्वकर्मभिः॥प्रबोधमानानियथापुष्पाणिचफलानिच॥स्वकालंनातिवर्तंतेतथा
कर्मपुराकृतं॥येनैवचयथापूर्वंकृतंकर्मशुभाशुभं॥एवंहालालनुवै[illegible]केनित्यंविहिमात्मानः॥
आत्मनाविहितंदुःखमात्मनाविहितंसुखं॥गर्भशय्यामुपादायभुज्यतेपूर्वदेहिकं॥पूर्वदेहेकृतंकर्म
नकश्चित्पुरुषोभुविबलेनप्रज्ञयावापिनकश्चित्कर्तुमन्यथा॥अन्यथाशास्त्रगर्भिण्याधियाधीरो
र्थमीहते॥स्वामिवत्प्राकृतंकर्मविदधातितदन्यथा॥स्वकृतान्युपतिष्ठंतिदुःखानिचसुखानिच॥हे

इति· १०

उपतिष्ठतीति तिष्ठंतं गच्छंतमनुगच्छति २

शुभस्तोहियस्त्वेषांसोहंकारणंबाध्यते॥यथाधेनुसहस्त्रेषुवत्सोविंदतिमातरं॥तथापूर्वकृतंकर्मकर्ता
रमनुगच्छति॥कैरानिकुर्वतः कर्मछायेवानुविधीयते॥यथाछायातपौनित्यंसुसंबंधौपरस्परं॥
तद्वत्कर्मचकर्ताचसंबंधौनात्रसंशयः॥ग्रहरोगीविषंसर्पानाराज्ञानःशत्रुस्तथा॥बाधयंतिनरः
पश्चात्पीडितंपूर्वकर्मणा॥येनयत्रोपभोक्तव्यंसुखंवादुःखमेवच॥सततत्रबद्धोरज्ज्वेवबलाद्देवेन
नीयते॥अथाभ्यु तं कर्मबध्यमेतज्जिघांसति॥शस्त्राग्निविषदुर्गेभ्योरक्षितव्यंचरक्षति॥अ
रक्षितंतिष्ठतिदैवरक्षितंसुरक्षितंदैवहतंविनश्यति॥जीवत्यनाथोपिवनेविसर्जितःकृतप्रय
त्नोपिगृहेनजीवति॥यथापृथिव्यांबीजानिअन्नानिचधनानिच॥तथैवात्मानिकर्माणितिष्ठंतिप्र
भवंतिच॥तैलक्षयाद्यथादीपोनिर्वाणमधिगच्छति॥कर्मक्षयात्तथाजंतोःशरीरंनाशमृच्छति
॥कर्मक्षयेनृणांमृत्युस्तत्वविद्भिरुदाहृतः॥विविधाःप्राणिनस्तस्यग्रहरोगाश्चहेतवः॥तस्मा श्रीः ॥१०॥

त्वारंनवामसुनेमौलुब्धकपन्नगौ॥नैवयंब्राह्मणीवृद्धाशिशुर्वानात्रकारणं॥दुःखानांचसुखानां
चजन्मनोमरणस्यच॥आत्मैवह्यात्मनोयोनिश्चिरपक्षानोरिवारिणिः॥भीष्मउवाच॥ ॥एवमुक्ता
तुकालेनविप्राणीगौतमीसुतः॥स्वकर्मप्रत्ययाल्लोकान्मत्वार्जुनकमब्रवीत्॥ ॥गौतम्युवाच॥नैव
कालोनभुजगोनमृत्युरिहकारणं॥स्वकर्मभिरयंबालःकालेननिधनंगतः॥मयाचतत्कृतंकर्म
येनायंमेहतःसुतः॥यातुकालश्चमृत्युश्चमुंचार्जुनकपन्नगं॥ ॥भीष्मउवाच॥ततोयथागतंज
ग्मुःकालमृत्युभुजंगमाः॥अभद्विशोकोर्जुनकोविशोकाचैवगौतमी॥एतच्छ्रुत्वाशमंग
च्छमाभूश्चिंतापरोनृप॥स्वकर्मप्रत्ययंमत्वाचिंतांजहिहिभारत॥नतत्वयाकृतंपार्थनापिदुर्योधन
दीपि:॥कालेनचकृतंसर्वंनिहतायेनपार्थिवाः॥ ॥वैशंपायनउवाच॥इतितस्यवचःश्रुत्वाध
र्मपुत्रोयुधिष्ठिरः॥शांतिशोकंपरित्यज्यबभूवस्वस्थमानसः॥ ॥इतिश्रीइतिहाससमुच्चये
नैव ४

द्वाति
२२

गौतमीलुब्धकसंवादोनामद्वितीयोध्यायः॥ ॥वैशंपायनउवाच॥ ॥इत्युक्तवतितेभीष्मेकुरुस्वेचपडुनं
दने॥सराजाराजशार्दूलव्यासंपुनरभाषत॥युधिष्ठिरउवाच॥ ॥दानस्यतपसोवापिभगवन्किंनु
दुष्करं॥किंवामहाफलंप्रेत्यतन्मेब्रूहिपितामह॥व्यासउवाच॥ ॥दानान्नदुष्करतरंपृथिव्यामस्तिकिंच
न॥राजेन्द्रप्रत्यक्षमेवैतत्दृश्यतेलोकसाक्षिकं॥परित्यज्यप्रियान्प्राणान्अर्थार्थेहिमहद्भयं॥प्रविश्यं
तिनरालोभात्समुद्रमटवींतथा॥सेवांचान्येप्रपद्यंतेश्ववृत्तिरितियास्मृता॥हिंसाप्रायावहूकृशा
न्कृषीनैवतथापरे॥तस्यदुःखार्जितस्येहप्राणेभ्योपिगरीयसः॥अर्थस्यपुरुषव्याघ्रपरित्याग
सुदुःकरः॥विशेषतोमहाराजतस्यन्यायार्जितस्यच॥श्रद्धयाविधिवत्पात्रेतस्यांतोनैवविद्यते॥
श्रद्धाधर्मेभवतींदेवीपावनीविश्वधारिणी॥श्रद्धयाधार्यतेधर्मोमहद्भिर्नार्थराशिभिः॥निःकिंचना
पिमुनयःश्रद्धावंतोदिवंगताः॥अत्रैवोदाहरंतीमामितिहासंपुरातनं॥व्रीहिद्रोणपरित्यागात्फलं श्री ४
पवित्रीप्रसविञ्जीवसंसारार्णवतारिणि २

यत्प्रापमुद्गलः॥शिलोञ्छवृत्तिर्धर्मात्माकुरुक्षेत्रेवसत्पुरा॥महर्षिर्मुद्गलोनामदांतोतीवातिथिप्रि
यः॥स्वाध्यायव्रतसंपन्नःसत्यवागनुसूयकः॥जितेंद्रियोजितक्रोधोसाक्षाद्धर्मइवापरः॥उञ्छवृत्यास
पक्षेपिव्रीहिद्रोणमुपार्जयन्॥सहपुत्रदारःपक्षांतेसदत्त्वातिथिशेषभुक्॥तंदृष्ट्वाद्भुतकर्माणंदुर्वासो
द्रष्टुमागतः॥उन्मत्तरूपोदिग्वासोव्याहरन्विविधागिरः॥अथोपगम्यतंशाहमुद्गलंशंसितव्र
तं॥अन्नार्थिनमनुप्राप्तंविद्धिमामतिथिंमुने॥ततस्तंमुद्गलोदृष्ट्वाप्रतीतात्मात्मपूजयत्॥उवाचचै
नंमधुरैर्वचोभिस्तर्पयन्निव॥ ॥मुद्गलउवाच॥अहोतीवसभाग्योहंयस्यमेत्वंद्विजोत्तम॥मनोर
थदुर्लभ्यानोवेलायांसमुपागतः॥त्वदागमनेनमेनाथहर्षेणाविष्टचेतसः॥महोत्सवसमोब्रह्मन्
दिवसःप्रतिभातिमे॥ ॥व्यासउवाच॥ ॥एवमुक्त्वायथान्यायंतमभ्यर्च्यसधर्मवित्॥शिलोंछो
पार्जितमन्नंततआदायतस्मैमुदान्वितः॥नदत्त्वासर्वमेवासौतेनश्रद्धोपपादितं॥स्वांगान्यालिप्य

द्रति०
१२

शेषेणप्रथयैवोहियथागतं॥तस्यैवंसर्वकालेनुप्राप्तेप्राप्तमहात्मनः॥आगच्छन्मुनुजेसोन्नंपद्दृष्टात्वः
सर्वमेवतु॥सचैनंविक्रियांनेतुंनशशाकास्यमानसं॥नक्रोधोनचकार्पण्यंनावमानोनमत्सरः॥तंतु
दृष्ट्वावंविज्ञायप्रातःश्रेवाचसद्विजः॥दुर्वासोवाच॥ ॥लोकेत्वत्सदृशोदातानस्त्तोनभविष्यति॥सु
धयानिर्जितैस्सर्वंत्रैलोक्यंसचराचरं॥क्षुद्धर्मसंज्ञांप्रणुदंनादत्तेधैर्यमेवतु॥येदुर्जयांतांजय
तितेपिस्वर्गाजितोभवेत॥जितास्तेकर्मभिर्लोकाःप्राप्तोसिपरमांगतिं॥अहोदानेनतुष्यंतेसु
महत्स्वर्गवासिनः॥जितस्त्वेदुर्जयाःकामाक्रोधलोभोमदस्तथा॥पैशुन्यंमत्सरंमायांमनःकार्प
ण्यमेवच॥इंद्रियाणांजयोधैर्यंतपःसत्यंदमार्जवं॥दयादानंशमाश्चैवत्वयिसर्वंप्रतिष्ठितं॥
लोकाःसमस्ताधर्मेणधार्यंतेसचराचराः॥धर्मोहिधार्यतेब्रह्मन्त्वंभक्त्यैर्भवादृशैः॥धन्यो
स्यनुगृहीतोस्मिसमेत्यभवतासह॥साद्धिःसमागमोनित्यंसर्वपापहरस्मृतः॥व्यासउ०॥ १२

॥इत्येवंवदतस्तस्यतदादुर्वाससोमुनेः॥देवदूतोविमानेनमुद्गलंसमुपागतः॥दिव्यरत्नविचित्रेण
किंकिणीजालमालिना॥सर्वकामसमृद्धेनकामगेनसुवर्चसा॥उवाचचैनंब्रह्मर्षिंविमानमिदमा
रुह॥स्वकर्मोपार्जितांदिव्यांसिद्धिंप्राप्तोस्युत्तमां॥दिविदेवाधदेवेंद्रपुण्याब्रह्मर्षयस्तथा॥समु
त्सुकाश्चतिष्ठंतिकांक्षंतस्तवदर्शनं॥ ॥मुद्गलउवाच॥सतांसप्तपदीमैत्रीमाहुरेतन्मनीषिणः॥न
तःपृच्छामिविश्रंभात्त्वामहंहितकाम्यया॥केगुणावसतांस्वर्गेदोषावादेवदूतक॥एतत्तुब्रूहिततः
श्रुत्वाकरिष्याम्यात्मनोहितं॥ ॥देवदूतउवाच॥महर्षेकार्यबुद्धिस्त्वंयत्स्वर्गेसुखमुत्तमं॥संप्रा
प्तोवावमंतव्यंविमृश्यस्वबुध्यायथा॥नंदनादीनिरम्याणितत्रोद्यानानिमुद्गल॥सर्वकालफल
वृक्षैःशोभितानिसमंततः॥विमानानिचदिव्यानिसेवितान्यप्सरोगणैः॥सर्वरत्नविचित्राणिका
मगानिस्थिराणिच॥तरुणादित्यवर्णानिमुक्ताजालांतराणिच॥चंद्रमंडलशुभ्राणिहेमशय्यासना

दूति·
१२

निव॥ सर्वकामसमृद्धार्थाःसर्वदुःखविवर्जिताः॥ नराःसुकृतिनस्तेषुविचरंतियथासुखं। नतत्रनास्ति
कार्यांतिनास्तिचानाजितेंद्रियाः॥ नन्वशंसानपिशुनानकृतघ्नानमानिनः॥ सत्यास्तपस्विनःशूरा
दयावंतक्षमापराः॥ यज्वानोदानशीलाश्चतत्रगच्छंतिमुद्गल। नरोगोनजरामृत्युर्नशोकोनहि
तप्यते॥ नक्षुत्पिपासेनग्लानिर्विद्यतेतत्रकुत्रचित्॥ एतेचान्येचवहवोगुणाःस्वर्गेचमुद्गल॥
दोषांश्चतत्रयोविश्रृणुतानपिसांप्रतं॥ शुभस्यकर्मणस्तत्रफलंकृत्स्नंसमुभुंजते॥ नचान्यात्क्रिय
तेऽस्यस्तत्रदोषोमहास्मृतः॥ ॥मुद्गलउवाच॥ ॥महांतस्त्वल्पमीदोषास्त्वयास्वर्गेप्रकीर्तिताः
॥निर्दोषःशाश्वतःश्चान्योलोकस्तंत्वमेवद॥ देवदूतउवाच॥ ॥आब्रह्मभुवनादेतेदोषाःसं
तिमहामुने॥ एतएवहिनेच्छंतिस्वर्गप्राप्तिंमनीषिणः॥ आब्रह्मभुवनादूर्ध्वंतद्विष्णोःपरमंपदं॥
शुद्धंसनातनंज्योतिःपरंब्रह्मेतितद्विदुः॥ नतत्रसंदागच्छंतिपुरुषाविषयात्मकाः॥ दंभलोभम

श्रीः
१२

रक्रोधद्रोहमोहैर्विवर्जिताः॥ निर्ममानिरहंकारानिर्द्वंद्वाःसंजितेंद्रियाः॥ ध्यानयोगपराश्चैवतत्रग
च्छंतिसाधवः॥ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि॥ विमानमारुहक्षिप्रंगच्छामास्त्वरशाल
चे॥ ॥मुद्गलउवाच॥ एतच्छ्रुत्वाससुमिनिस्तंदूतंप्रत्यभाषत॥ नाहंस्वर्गंगमिष्यामित्वंगच्छाशुयथागतं
देवराजश्चदेवाश्चभवतावनमात्रमम॥ वंद्यास्समपितव्याश्चादिव्याब्रह्मर्षयस्तथा॥ ततोविसर्ज्यपि
त्वातंमुद्गलःस्वर्गनिस्पृहः॥ सर्वान्कामान्परित्यज्यध्यानयोगपरोऽभवत्॥ एकांतमतिरासीनो
निर्ममोनिरहंकृतिः॥ सर्वद्वंद्वसहोधीरःसर्वभूतहितेरतः॥ निग्रहीतेंद्रियग्रामोसंयोज्यात्मनमा
त्मानि॥ युक्तचित्तःस्वमात्मानंयुयोजपरमेश्वरे॥ एवंस्वपरमावस्थोयोगंयोगविदांवरः॥ प्राप्त
वांस्तत्परंधामदुःप्राप्यंसुरैरपि॥ तस्मात्त्वमपिराजेंद्रदेहिन्याय्यार्जितंधनं॥ दानाज्ज्ञानमतःप्रा
प्यज्ञानात्सिद्धिर्मनाप्स्यसि॥ यइदंश्रृणुयान्नित्यंपुण्याख्यानमनुत्तमं॥ विमुक्तःसर्वपापेभ्यो

इति॰ २५ विष्णुलोकंसगच्छति॥ ॥इतिश्रीइतिहाससमुच्चयेमुद्गलाख्यानंनामत्रतीयोध्यायः॥ ॥वैशं
पायनउवाच॥ ॥कथयित्वाहितीर्थानांप्रभावानद्भुतांस्तथा॥लोमशंधर्मतत्वज्ञंपर्यपृच्छयुधि
ष्ठिरः॥ ॥युधिष्ठिरउवाच॥योरक्षेत्प्राणिनांब्रह्मन्भयात्शरणागतान्॥तस्यपुण्यफलंयत्स्यात्त
न्मेब्रूहितपोधन॥लोमशउवाच॥ ॥एकतःक्रतवःसर्वेसमाप्तवरदक्षिणाः॥एकतोभयभीतस्य
प्राणिनःप्राणरक्षणं॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥इंद्रस्याग्नेश्चसंवादंशिबेरौशीनर
स्यच॥वर्तमानेमहायज्ञेजिज्ञासार्थीशिबिंनृपं॥इंद्रःश्येनःकपोतोग्निःभूत्वातत्रोपजग्मतुः॥
अथोरुंनृपतेःप्राप्यकपोतःश्येनजाद्भयात्॥शरणार्थीमहीपालंविविशेभयविह्वलः॥ततः
शनैःसमागम्यश्येनरूपीसुरेश्वरः॥राजानंसुमहात्मानंप्रोवाचेदंवचस्तदा॥ ॥श्येनउवाच॥ श्रीः
॥आहुस्त्वंधर्मतत्वज्ञंसर्वब्रह्मविदोद्विजाः॥सत्वंधर्मविरुद्धंहिकथंकर्मचिकीर्षसि॥भवान्रक्षे २५

कृतघ्नंहनेनसत्येनानृतवादिनं॥क्षमयाक्रूरकर्माणंमसाधुंसाधुनाजयेत्॥अपकारेपरेचैवमुपकार
परोजनः॥अपकारपरेपित्वंमुपकारपरोयथा॥अहितोहितबुद्धिस्त्वंमपापोप्यसिसर्वदा॥दोषान्वेषण
रक्षोपिगुणान्वेषणतत्परः॥सदैवाविहितोभक्षःपीड्यमानस्यमेक्षुधा॥महांस्त्वंधर्मबुध्यात्वंनाधर्मंक
र्तुमर्हसि॥ ॥राजोवाच॥संत्रस्तरूपःप्राणार्थीत्वत्तोभीतोविहंगमः॥मत्सकाशमनुप्राप्तःप्राणगृ
ध्नुरयंखगः॥तदेवमागतस्यास्यकपोतस्याभयार्थिनः॥कथमस्माद्विधस्त्यागंकुर्यात्साधुविगर्हितं॥
लोभाद्द्वेषाद्भयाद्वापियस्त्यजेच्छरणागतं॥ब्रह्महत्यासमंतस्यपापमाहुर्मनीषिणः॥शास्त्रेषुनिष्कृ
तिर्दृष्टामहापातकिनामपि॥शरणागतहंतुश्चनदृष्टानिष्कृतिःक्वचित्॥यथात्मनःप्रियाःप्राणाः
सर्वेषांप्राणिनांतथा॥तस्मान्मृत्युभयंत्रस्ताःत्रातव्याःप्राणिनोबुधैः॥जन्ममृत्युजरारोगानित्यं
संसारसागरे॥जंतवःपरिक्लिश्यंतिमत्स्योच्छ्रस्यंनिर्जंतवः॥यन्नामिनोभवेच्छोकस्त्रासोवाक्रोधए

इति. वृथा॥ आवासो वा यतो भक्ष्मेकां ममपि संत्यजेत्॥ यथा चैतज्जीवितमात्मनः प्रियं तथा परेषामपि जीवितं प्रि-
॥२५ यं॥ संरक्ष्यसे जीवितमात्मनो यथा तथा परेषामपि रक्ष्य जीवितं॥ तस्मा त्राहमिमं भीतमर्पयिष्ये कपोतकं॥ य-
त्त्रयुक्तमन्यं तेन कुं श्येनाश्रुतं ददा॥ ॥श्येन उवाच॥ ॥आहारेण बलानि प्रभवंति नरेश्वर॥ आहारेण
विवर्द्धंते तेन जीवंति जंतवः॥ शक्यं तेन दुःकर्मार्गे आहारेण च जीवितुं॥ न त्वाहारविहीनः स्य शक्यं वर्त- तै१
यितुं क्वचित्॥ भक्ष्याद्विलोपितस्यैनेमम प्राणा विशांपते॥ विसृज्य कायं यास्यंति पंथानमपुनर्भवं॥
मृते मयि च सर्वं मे पुत्रदारा विनश्यति॥ रक्षमाणः कपोतस्त्वं बहून्प्राणान्न रक्षसि॥ धर्मं या बाधते
धर्मोन स धर्मः परंतप॥ अविरोधित्तु यो धर्मः स धर्मः सद्भिरुच्यते॥ तस्माद्विरोधधर्मस्याविविंसु-
गुरुलाघवं॥ यतो भयस्ततो राजन्कुरु धर्मविनिर्णयं॥ ॥राजोवाच॥ ॥नातो भयः परो धर्मः
कश्चिदन्योस्ति खेचर॥ प्राणिनां भयभीतानामभयं यः प्रयच्छति॥ वरमेकस्य सत्वस्य प्रदत्तं जीवि- २५

ताभयं॥ अभयं सर्वभूतेभ्यो यो ददाति दयापरः॥ तस्य देहाद्विमुक्तस्य भय एव न विद्यते॥ हेमधेनुधरादा-
नं दातारः सुलभा भुवि॥ दुर्लभः पुरुषो लोके सर्वजीवदयापरः॥ महतामपि यज्ञानां काले नक्षीयते फलं
॥भीताभयप्रदानस्य क्षय एव न विद्यते॥ दत्तमिष्टं तपस्तप्तं तीर्थं वेदश्रुतं तथा॥ सर्वाण्यभयदानस्य
कलां नार्हंति षोडशीं॥ चतुःसागरपर्यंतां यो दद्यात्पृथिवीमिमां॥ अभयं यस्तु भूतेभ्यस्तयोरभयदो
धिकः॥ परित्यजेहि राजेंद्रं शरीरं वापि दुस्तरं॥ न त्विमं भयसंत्रस्तं मंके दीनं कपोतकं॥ यन्ममास्ति शुभं
किंचित्तु राजन्मनि जन्मनि॥ भयत्राणाभयार्तानामार्तिनाशाय देहिनां॥ न त्वहं कामये राज्यं न स्वर्गं
न पुनर्भवं॥ प्राणिनां दुःखतप्तानां कामये दुःखनाशनं॥ यथा चनान्ततं वाणि महमेका मुदाहरे॥ स-
त्येनानेन भगवान्प्रसीदतु महेश्वरः॥ आहारार्थं समारंभं न च वाचं विहंगमां॥ यद्यथेष्टं तवाहारं मत्स्यैर्द-
दाम्यहं॥ श्येन उवाच॥ ॥याद्दृशो विहितोस्माकं धात्रा भक्ष्यः कपोतकः॥ यन्मे त्वंस्तज्मतारारेः का

१ ॥.

द्रौति २६

र्मस्य परैर्मम॥ श्येनाः कपोतान्खादंति स्थितिरेषा सनातनी॥ मा राजंसु हदं मत्वाऽक कदलीस्तंभमारुह॥
राजोवाच॥ ॥नाहं तु शास्त्रमार्गेण क्वचित्प्रवर्ते विहंगम॥ शास्त्रैरेव तथोक्तोऽयं धर्मः सत्यदयापरः॥ स
र्वसत्वेषु पद्दानमेकस्तत्र दया दया॥ सर्वसत्वप्रदानात्तु दयैकाविविशिष्यते॥ वाङ्मनःकर्मभिर्ये तु सर्वभू
तहिते रताः॥ दयार्द्रीतपथानां ब्रह्मलोकं व्रजंति ते॥ गच्छतास्तिष्ठतो वापि जाग्रतस्वपतोपि वा॥ यत्र
भूतहितार्थाय तत्स्यशौरिव वेष्टितं॥ जंगमानि च भूतानि स्थावराणि च ये नराः॥ आत्मवत्परिरक्षंति
ते यांति परमां गतिं॥ प्राणिनं बध्यमानं तु यः शक्तः समुपेक्षयेत्॥ स याति नरकं घोरं मितिप्राहुर्मनी
षिणः॥ राज्यं शिबीनां सुमहत्प्रयच्छामि तवांडज॥ यदि कामयसे चान्यद्ब्रूहि त्याक पोतकं॥ ॥श्येन
उवाच॥ ॥यदि राजन्कपोते तु सुहृत्प्रीतिरीदृशी॥ न त्वं कपोततुल्यानि स्वमांसानि प्रयच्छमे॥
॥राजोवाच॥ ॥अनुग्रहमिमं मन्येयन्मां श्येनाभिभाषसे॥ एते हं ते प्रयच्छामि स्वमांसं यावदिच्छ २६

सि॥ यदप्रियं न स्तु जनन्घ्विरा हृदनिवा न वा॥ मम तु प्रियमेवैतत्कस्मादभिहितंचिरात्॥ अध्रुवेण शरी
रेण प्रतीक्षण विनाशिना॥ ध्रुवो योनार्जयेद्धर्मं स शोच्यो मूढचेतनः॥ यदि प्राणैरुपकाराय देहो यं नोपयु
ज्यते॥ ततः किमुपचारोस्य प्रत्यहं क्रियते वृथा॥ ॥श्येन उवाच॥ ॥नातिरिक्तमहं याचे तव मांसं नरेश्व
र॥ तस्मात्प्रयच्छ सदृशं प्रयच्छ तुलया धृतं॥ ॥राजोवाच॥ ॥तदेवाहं करिष्यामि यन्मां श्येनाभिभा
षसे॥ येनास्य रक्षणं मे स्याद्दत्वा तव विहंगम॥ ॥लोमश उवाच॥ ॥एवमुक्त्वा स्वमांसानि समुत्कृत्य स
पार्थिवः॥ प्रहृष्टस्त्वतथा मांसं कपोतेन सह प्रभुः॥ त्यक्त्वात्मसुखभोगेच्छां सर्वसत्वहितैषिणः॥ भवंति
परदुःखेन साधवो नित्यदुःखिताः॥ ध्रियमाणस्तु तुलया कपोतोप्यतिरिच्यते॥ पुनश्चोत्कृत्य मांसानि
राजन्नादात्स पार्थिवः॥ न विद्यते यदा मांसं कपोतेन समं क्वचित्॥ ततः प्रक्षीणमांसोसावारुरोह तुलां
स्वयं॥ परदुःखातुरा नित्यं सर्वसत्वसुखेरताः॥ नापेक्षंते महात्मानः स्वसुखानि महांत्यपि॥ अथ न

इति॰
२८

स्मिन्समारूढेतुलामोषीनरेन्द्रपे॥देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह॥ततस्तस्याःस्वमांसंमत्वामेधैराज
स्थितिंपरां॥शक्रःस्वरूपमास्थायवाक्यमेतदभाषत॥शक्रोहमस्मिभद्रंतेकपोतोहव्यवाहनः॥जिज्ञासमा
नौत्वांराजन्नद्रमंयज्ञमुपागतौ॥नैतत्त्वैन्नपाश्चक्रुःनकरिष्यंतिचापरे॥महाकारुणिकोनैवयत्त्वत्कृतंदु
ष्कृतंत्वया॥परार्थेत्यजतःप्राणान्याप्रीतिरभवत्तव॥प्राणसंत्राणलुब्धेषुनस्याप्राणिषुदेहिनां॥परा
र्थैःकांतिकाधियास्वाश्रयात्यंतनिष्ठुरा॥त्वय्येवकेवलंराजन्कुरुतेकरुणापदं॥स्वकर्मपाशैःसुदृ
ढैर्बद्धंदीनमिदंजगत्॥त्वंजगद्धःस्वमोक्षायबद्धःकरुणयान्नप॥तथासर्वात्मनाचापिदेहेषुप्रथि
तंत्वया॥यथानैवात्मसंपन्नावात्मनापिनरोचितः॥अहंत्वेर्ष्याविशिष्टेषुहीनान्नवमन्यसे॥अहंत्वा
सदृशोस्यत्वंलोकोत्तमतांगतः॥आत्मप्राणैःपरप्राणान्योनरःपरिरक्षति॥सयातिपरमंस्था
नंयस्मान्नावर्ततेपुनः॥प्राणैरपित्वयाराजन्रक्षितःकृपणोजनः॥स्वमांसान्यपिदत्तानिद्रव्यमन्ये २८

य॰३

षुकाकथा॥पशवोपिहिजीवंतिकेवलात्मोदरंभराः॥सपुनर्जीवितश्लाघ्योयःपरार्थैर्हिजीवति॥किंचात्रचि
त्रंयत्संतःपरानुग्रहतत्पराः॥नहिस्वदेहशांत्यर्थंजायंतेचंदनद्रुमाः॥परोपकारव्यापारपरोयःपुरुषः
सदा॥सपदंतदवाप्नोतिपरादृष्टिनयत्परं॥परोपकारैकधीःस्वदुःखापगमस्पृहा॥जगद्धितायजा
यंतेसाधवस्त्वादृशाभुवि॥यत्तेमांसानिगात्रेभ्यःसमुत्कृत्तानिपार्थिव॥एषातेशाश्वतीकीर्तिर्लोका
ननुगमिष्यति॥दिव्यरूपधरश्चैवपालयित्वातुमेदिनीं॥सर्वलोकानतिक्रम्यब्रह्मलोकंगमिष्यसि॥
एवमुक्त्वानिमेषाग्निर्जग्मतुस्त्रिदशालयं॥राजालुक्रतुमश्रालसुमुदेववदन्तदा॥यइदंशृणुयान्नि
त्यंशिबेश्चरितमुत्तमं॥सविधायहपापानिप्रयातित्रिदिवंनरः॥विचिंत्यराजास्वशरीरमध्रुवंधनं
परःसर्वजनस्यदुर्लभं॥शरीरदानात्परजीवरक्षणंविधायलोकत्रयभूषणंययौ॥ ॥इतिश्री
इतिहाससमुच्चयेशिबिचरित्राख्यानंनामचतुर्थोध्यायः॥ ॥ ॥वैशंपायनउवाच॥ ॥बृहस्प

इति॰
१८

तिसमं बुध्या शक्रतुल्यपराक्रमं॥ शरतल्पगतं भीष्मं ऋषयो द्रष्टुमागता:॥ अत्रिर्वसिष्ठोथ भृगु: पुलस्त्य:
पुलह: क्रतु:॥ अंगिरा गौतमोगस्त्य: सुमंतुश्चायुरात्मवान्॥ विश्वामित्र: स्थूलशिरा संवर्तवक्र कर्दम:॥ रैभ्यो
बृहस्पति र्धौम्यश्च्यवन: कश्यपो ध्रुव:॥ दुर्वासा जमदग्निश्च मार्कंडेयोथ गालव:॥ उशनाथ भरद्वाजो
यवक्रीतस्त्रितकुस्तथा॥ स्थूलाक्ष: शकलाक्षश्च काण्वो मेधातिथि: क्रतु:॥ नारद: पर्वतश्चैव सर्वे च मु
नयस्तथा॥ मित्रभार्गव नौ व्यास: शतानंद: कृतुव्रत:॥ जामदग्न्यस्तथा राम: कचइत्येवमादय:
तान् प्रणम्य यथान्यायं धर्मराज: सहानुज:॥ विधिवत्स्वजपामास जगत्स्रष्टा: सुतेजस:॥ ते प्रजिता
महात्मान: सुखासीनास्तपोधना:॥ एते भीष्माश्रिता श्चक्रु: दिव्या धर्माश्रिता: कथा:॥ कथांते
तु द्विजेंद्राणां महर्षीणां भावितात्मनां॥ प्रणम्य शिरसा भीष्मं पप्रच्छेदं युधिष्ठिर:॥ ॥युधिष्ठिर उवा
च॥ ॥के देशा: सुमहत्पुण्या: का नद्य: के च पर्वता:॥ सेव्या धर्मार्थिभिर्नित्यं तन्मे ब्रूहि पितामह॥ १८

॥भीष्म उवाच॥ ॥अत्रैवोदाहरंतीममितिहासं पुरातनं॥ शिलोंछवृत्ते: संवादं सिद्धस्य च महात्मन:॥ का
श्चित्सिद्ध: परिश्राम न्समस्तां पृथिवीमिमां॥ उंछवृत्तेर्गृहस्थस्यासिद्धस्य च महात्मन:॥ सतं सम्यक्
कृतातिथ्यं सुखासीनं गतक्लमं॥ एवमिममेवार्थं यन्मां त्वं परिपृच्छसि॥ ॥ऋषिरुवाच॥ ॥के देशा:
के जनपदा: का नद्य: के च पर्वता:॥ श्रेष्ठा: पुण्यतमाश्चैव ज्ञेया: सिद्ध वदस्व मे॥ ॥सिद्ध उवाच॥ ते देशा
स्ते जनपदास्ते शैलास्तेपि चाश्रमा:॥ पुण्या त्रिपथगा येषां मध्येयाति सरिद्वरा॥ तपसा ब्रह्मचर्ये
ण यज्ञैस्त्यागेन वा पुन:॥ गतिं न लभते जंतुर्गंगासंसेव्य तां लभेत्॥ स्नातानां शुचिभिस्तोयै: गां
गेयै र्नियतात्मनां॥ गतिर्भवति या पुंसां न सा क्रतुशतैरपि॥ अपहत्य तमस्तीव्रं यथा भात्युदये
सति॥ तथापहत्य पापानि भातिगंगाजलाप्लुत:॥ अग्निं प्राप्य यथा सद्यस्तृणराशिर्विनश्यति॥
तथा गंगावगाहेन सर्वपापं विनश्यति॥ यस्त्वसूर्यांशु संतप्तं गांगेयं सलिलं पिबेत्॥ पापं विहा

दृनि·
१९

यनिर्मुक्तोपावकान्तुविशिष्यते॥ चांद्रायणसहस्रंतु यश्चरेत्कायशोधनं॥ पिबेद्यश्चापिगंगायाःपयश्चो
सोसमोभवेत्॥ तिष्ठेद्युगसहस्रंतुपादेनैकेनयःपुमान्॥ पिबेद्यथेष्टंगंगायाःस्वयश्चासोसमोभवेत्
योनरःसविशिष्यते॥ लंबेदधःशिरायस्तुवर्षाणामयुतंनरः॥ मासमेकंतुगंगायासेवनंसममेवतु
॥ भूतानामिहसर्वेषांदुःखेनाविष्टचेतसां॥ गतिमन्वेषमाणानांनास्तिगंगासमागतिः॥ महद्भि
रुपपातैश्चग्रस्ताननेकानिमहानवान्॥ पततोनरकेघोरेगंगातरतिसेवनात्॥ यथोपजीविकाधे
नुर्देवानांकामदास्मृता॥ तथैवदेहिनांगंगासर्वकामफलप्रदा॥ जाह्नवीतीरसंभूतांमृदंमूर्ध्नी
बिभर्तियः॥ बिभर्तिरूपंसूर्यस्यतमोनाशंसुनिर्मलं॥ सप्तावरान्सप्तपरान्पितॄंस्तेभ्यश्चयेपरे॥
नरस्तारयतेगंगादृष्टापीतावगाहिता॥ दर्शनात्स्पर्शनाद्ध्यानात्तथागंगेतिकीर्तनात्॥ पुनात्य
पुण्यान्पुरुषान्शतशोथसहस्रशः॥ यदिच्छेत्सफलंजन्मपौरुषंश्रुतमेवच॥ सपितॄंस्तर्पये

द्गंगामधिगम्यप्रसुरांस्तथा॥ श्रुताथकीर्तिताध्यातादृष्टापीतावगाहिता॥ गंगातारयतेनॄणांउभौवंशौ
विशेषतः॥ जात्यंधैरिहतुल्यास्तेमृतैःपंगुभिरेवच॥ समर्थायेनपश्यंतिगंगांपुण्यजलांनदीं॥ वान
प्रस्थैश्चयतिभिर्गृहस्थैर्ब्रह्मचारिभिः॥ विद्वद्भिःसेवितांगंगांपुण्यांकोनामनाश्रयेत्॥ मनोवाक्का
यजैर्ग्रस्तैःपापैर्बहुविधैरपि॥ वीक्ष्यगंगांभवेत्पूतःपुरुषोनात्रसंशयः॥ उत्क्रामद्भिश्चयःप्राणैः
प्रयतैःश्रद्धयान्वितः॥ चिंतयेन्मनसागंगांसोपिगच्छेत्परांगतिं॥ यावदस्थिमनुष्याणांगंगातोयेषु
तिष्ठति॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥ पूर्वेवयसिपापानिकृत्वाकर्माणियेनराः॥ पश्चा
द्गंगांनिषेवंतितेयांतित्रिदशालयं॥ गंगांतांसुमहत्पुण्यांपतंतींयांमहेश्वरात्॥ आदधौशिरसादे
वस्तांगंगांकोनसंश्रयेत्॥ त्रिषुलोकेषुपुण्यत्वात्गंगायाःप्रथितंयशः॥ यापुत्रान्सगरस्यैता
न्भस्मीभूतान्नयेद्दिवं॥ अंधाःक्लीबाजडाव्यंगाःपतितारोगिणोत्यजाः॥ गंगांसंसेव्यपुरुषादे

द्रुति· २०

वैर्गच्छंति साम्यतां ॥ देवलोकेपि पुण्यत्वात्कस्तांयो नाम संश्रयेत् ॥ सर्वपापहरां गंगां सिद्धगंधर्वसेवि
तां ॥ दक्षां पृथिवीं वहंतीं विश्वरूपां शिवामृतां ॥ पुराणां सुप्रसादां तु सर्वभूते प्रतिष्ठितां ॥ हरस्य चांगसंप
र्कात्पवित्रत्वं समागतां ॥ को नाम नाश्रयेद्गंगामशेषदुरितापहां ॥ गंगायां मरणं चैव दृढा भक्तिश्च के
शवे ॥ ब्रह्मविद्याप्रबोधश्च नाल्पस्य तपसः फलं ॥ कांक्षंते पितरः पुंसां सर्वेषां मुनिपुंगव ॥ मद्वंशजो
यो धर्मात्मा कदा गंगां गमिष्यति ॥ गंगोदकैर्यदा मर्त्यः पितॄंस्तर्पयिष्यति ॥ तदा जन्मफलं प्राप्तः स
धन्यः पुरुषो भुवि ॥ सुदूरस्थोपि यो ब्रूयात्त्रिसंध्यं नियतः शुचिः ॥ गंगा गंगेति गंगेति स गच्छेत्पर
मां गतिं ॥ मरणे स्मरणं विष्णोः कथ्यतेत्यंतदुर्लभं ॥ तदप्यल्पेन कालेन गंगां संसेव्य लभ्यते ॥ गुणा
नामेकदेशोयं गंगायाः कीर्तितो मया ॥ समस्तानिह को वक्तुं शक्तो वर्षशतैरपि ॥ यथार्णवस्य रत्ना
नि मेरोश्च कनकोपलाः ॥ संख्यातुं नैव शक्यं ते भागीरथ्यास्तथा गुणाः ॥ ॥भीष्म उवाच ॥ ॥ २०

इति परमतिगुणाननेकान् गंगायाश्चापि त्रिपथानुरूपान् ॥ बहुविधमभिधाय तत्त्वभूतान् गंगाज
ल्ये धृतिमान् विवेश सिद्धः ॥ सिद्धस्य वाक्यं हितलः [illegible]चाविप्रः सबोधितः ॥ गंगामुपेत्य विधिवत्तत्सि
द्धिं प्राप दुर्लभां ॥ तस्मात्त्वमपि राजेंद्र श्रद्धया परया युतः ॥ गंगामेव निषेवस्व ततः सिद्धिमवाप्स्यसि ॥
इतिहासमिमं पुण्यं यः पठेच्छ्रद्धयान्वितः ॥ सर्वपापविनिर्मुक्तः स याति परमां गतिं ॥ ॥इति श्रीइति
हाससमुच्चये गंगामहात्म्यं नाम पंचमोध्यायः ॥ ॥जनमेजय उवाच ॥ ॥पितामहस्य मे यज्ञे
धर्मराजस्य धीमतः ॥ यदाश्चर्यमभूत्किंचित्तन्मे ब्रूहि तपोधन ॥ ॥वैशंपायन उवाच ॥ ॥शृणु त
न्महाप्राज्ञ यदाश्चर्यमभून्महत् ॥ तर्पितेषु द्विजाग्र्येषु दीनांधकृपणेषु च ॥ घुष्यमाणे महायज्ञे दि
क्षु सर्वासु वा मनेः ॥ पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्धनि ॥ बिलान्निःसृत्य नकुलः कांचनार्धतनु भा
मु र्महान् ॥ दृष्ट्वावभृथे चेदं मानुषं सुमहत्स्वनात् ॥ नकुल उवाच ॥ ॥ सक्तुप्रस्थस्य यज्ञेन नायं प

इति· ह्नःसमोन्टप॥ उंछवृत्तेर्गृहस्थस्यकुरुक्षेत्रनिवासिनः॥ तस्यतद्वचनंश्रुत्वाविस्मितास्तेद्विजातयः
२१ समुपेत्याद्दताःसर्वेतमपृछन्नकुलंतद्गकारं॥ ॥द्विजाऊचुः॥ कस्त्वमत्यद्भुताकारःकुतोवेहागतोभ
वान्॥ किमर्थंत्वमहायज्ञमिदंराज्ञोविगर्हसि॥ ॥नकुलउवाच॥ नैषामयामृषोक्तावाकूनदर्पान्न
चमत्सरात्॥ तथैवतत्सुराव्यक्तंतत्सर्वंशृणुतद्विजाः॥ उंछवृत्तिर्द्विजःकश्चित्कुरुक्षेत्रेवसत्पुरा॥ ष
ष्ठान्नकालिकोनित्यंसभार्यःससुतस्नुषः॥ तत्राप्यवसतस्तस्यदुर्भिक्षमभवन्महत्॥ कृच्छ्र
प्राणोद्यतस्तत्रसर्वलोकक्षुधान्वितः॥ सतदाक्लिश्यमानस्तुसकुटुंबोमहातपाः॥ कालेकाले
नसंप्राप्तेनाशनंप्रापकिंचन॥ कृच्छ्रेणतेयवप्रस्थमार्जयत्सुमहत्तपाः॥ कृत्वासक्तूंश्चविधि
वत्तुज्जीविभजत्तदा॥ ततःक्षुत्क्षामदेहानांलेपांतरक्षुभुक्षतां॥ तेन्मात्रस्सर्वगृहसाराणांअति
थिःकश्चिदाययौ॥ धन्योस्म्यनुगृहीतोस्मियन्मेसिंतपतोभवान्॥ संप्राप्तातिथिवेळायां २१

धर्मातिस्थिवनेतायदा॥ स्वागतंतेद्विजःश्रेष्ठपुनःसुस्वागतंचते॥ सनाथंक्रीयतांब्रह्मन्नुटजेमेप्रविश्यतां॥ तेगृ
हागृहिमांधन्यायेपुमार्गश्रमातुराः॥ स्वगृहेष्विवविधस्ताविश्रमंतिभवादृशाः॥ अहोतीवसभाग्यपा
लतेचापिगृहमेधिनः॥ येषामभ्यन्यदिवसागछंत्यतिथिपूजया॥ तृणानिभूमिरुदकंवाक्चतुर्थीच
सून्नता॥ एतानिवसतांगेहेनोछिद्यंतेकदाचन॥ ॥नकुलउवाच॥ ॥एवमुक्त्वासधर्मात्मातमभ्यर्च्य
यथाविधि॥ स्वभागंप्रददौहृष्टोनलुलुष्यतितेनसः॥ ततोस्यभार्याक्षुत्क्षामावद्धारीनानपस्विनी॥
त्वगस्थिभूतावेपंतीभर्तारमिदमब्रवीत्॥ ब्राह्मण्युवाच॥ ॥किंविषण्णोसिधर्मज्ञोविद्यमानेषु
सक्तुषु॥ तुष्ट्यर्थमतिथेरस्यमद्भागोपिप्रदीयतां॥ ॥ब्राह्मणउवाच॥ अपिकीटपतंगानांमृगादी
नांचशोभने॥ स्त्रियेपरक्ष्याश्चपोष्याश्चतन्मैवंवक्तुमर्हसि॥ धर्मकामार्थकार्याणिशुश्रूषाकुल
र्गश्च संततिः॥ दारेष्वधीनःसर्वेस्यैपितृणामात्मनस्तथा॥ नानुकंपतियोभार्यांपुष्टोरक्षतिएवच॥ अ

नकरोतिहियोषणां

पश्चोमहदाप्नोति नरकं चैव गच्छति ॥ ब्राह्मण्युवाच ॥ ॥ स्पष्टोसहृनरो धात्रा दंपती नि द्विजोत्तम ॥ तस्मान्म
हति धर्मे मां न बाह्यां कर्तुमर्हसि ॥ पतिर्नार्याः परो धर्मः पतिरेव हि दैवतं ॥ पतिरेव परो बंधुः पतिरेव परा
गतिः ॥ धर्ममर्थं च कामं च पतः स्वर्गतिरेव च ॥ पत्युः प्रसादात्स्त्री सर्वमेतत्प्राप्नोत्यसंशयं ॥ कर्मणा
मनसा वाचा या स्त्री पतिरनुव्रता ॥ इहस्येव महाभागा देवतैरपि पूज्यते ॥ नमया त्वय्यभुक्ते तु भुक्तपू
र्वं कदाचन ॥ व्रतमेतद्धि दित्वा तु सक्तूंस्त्वं दातुमर्हसि ॥ ॥ नकुल उवाच ॥ ॥ एवमुक्त्वा गृहीत्वा तान्
सक्तून तिथये ददौ ॥ भक्षयित्वा तिथिस्तांस्तु नैव तुष्टो भवत्तदा ॥ ततः पुत्रो विदित्वैतत्पितरं प्राह धर्म
वित् ॥ त्वय्यर्थमतिथेस्तात मद्भागोपि प्रदीयतां ॥ किं तस्य जीवितफलं प्राणायस्याशयातिथिः ॥
अन्यादिव गृहाद्दीनो निराशः प्रतिगच्छति ॥ कुटुंबं पीडयित्वा तु यस्य कालो भवेन्मत्सरः ॥ ददाति यो
तिथिभ्योन्नं स याति परमां गतिं ॥ ॥ पितोवाच ॥ ॥ अपि वर्षशता पुत्रस्त्वं बाल एव मतो मम ॥ बा

बालानां क्षुद्बलिष्टा च तस्मात्त्वं भुंक्ष्व पुत्रक ॥ पुत्रेण लोकान्जयति श्रुतिरेषा सनातनी ॥ त्वया तु जीवि
ता वत्स लोकाः स्युः प्राप्स्यता मम ॥ तपोरिक्षु महत्तमं कृता विधिवदग्नयः ॥ संततिस्त्वं च मे पुत्र नाहं मस्यो
र्विभेम्यतः ॥ प्रायशः पापकारित्वात्मर्त्योरु द्विजतेनरः ॥ क्षुत हात्माः प्रतीक्ष्यंति मत्स्यं प्रियमिवातिथिं
॥ पुत्र उवाच ॥ ॥ पिता गुरुः पिता देवः पिता धर्मः सनातनः ॥ तुष्टे पितरि पुत्राणां तुष्टाः स्युः सर्वदेवताः ॥ श
रीरं संपदो दाराः श्रुतिरेषा सनातनी ॥ यस्य प्रसादात्प्राप्यं ते कोन्यः पूज्यो ततोधिकः ॥ एवं वयासि पुत्रस्य
ति पिता पुत्रमिति श्रुतिः ॥ उत्तरापितरं पुत्रस्तस्मात्सक्तून्प्रयच्छ मे ॥ ॥ नकुल उवाच ॥ इत्युक्तस्तान्गृ
हीत्वा तान्सक्तून तिथये ददौ ॥ भुक्त्वा तानपि सर्वांश्च न तुष्टिं समवाप्तवान् ॥ ततः स्नुषापि तं प्राह श्व
शुरं विनयान्विता ॥ मद्भागोपि महाप्राज्ञ द्विजस्यास्य प्रदीयतां ॥ ॥ ब्राह्मण उवाच ॥ ॥ या सेद्भातेस्नु
षा साध्वी नियतव्रतकर्शिता ॥ कुलसंततिहेतुस्त्वं रक्ष्यामे सर्वदेवा हि ॥ गुरुशुश्रूषया श्रांतां क्षुत्क्षामां

तपसिसिद्धितां॥तां दृष्ट्वाम्लानवदनांपीडतीवमनोमम॥भृत्यानामपरोधेनयं धर्मःक्रियतेशुभे॥ननं
संतःप्रशंसंतिनिंदशंसंजनसेवितं॥ ॥स्नुषोवाच॥ ॥भृत्यायत्रोपरुध्यंतेतत्रायंविहितोविधिः॥मन्य
तेनुग्रहंयत्रतत्रदोषोनकश्चन॥ममत्वंस्वामिनःस्वामीदैवतायानुदेवता॥गुरोर्गुरुर्गरीयांश्चतन्नैवंवक्तु
मर्हसि॥अनुकंप्येतिमामत्वाहदृष्टकेतिवाक्पुनः॥प्रयच्छभगवान्भ्राभ्चत्तदीनामनुगृहाणमां॥ततस्ता
नापिसक्तुप्रस्थंगृहीत्वातिथयेददौ॥बुभुजेचातिथिःसर्वंनचासौबुभुजेद्विजः॥अनुग्रहंमन्यमानःस
कुटुंबोमहामतिः॥धर्मेचापिहियुक्तात्मानचचालाचलोपमा॥तंशुद्धभावंविज्ञायप्रीतःप्रोवाचसद्वि
जः॥धर्मोहंद्विजरूपेणत्वांजिज्ञासुरिहागतः॥दमस्तपोदयादानंशांतिमिंद्रियनिग्रहः॥सत्यंक्षमा
र्जवंतानामित्येतान्जनवोमम॥धैर्येणमास्तानर्जित्वाभक्त्यामेभजतेनरः॥तदाभक्तिमतस्तुष्टिंम
गतिमिष्टांददाम्यहं॥यस्मात्संशुद्धभावेनदत्तंतत्कष्टार्जितंत्वया॥तत्तुष्टोसेनसर्वेस्त्वंतस्मात्स्वर्गमि

धैर्येणमास्तानवोमद्यां भक्त्या हि भजतेनरः २

तोव्रज॥स्वर्गस्थाःत्रिदशाःसर्वेदिव्याब्रह्मर्षयस्तथा॥स्तवंतिदानमेतत्तेविस्मयाविष्टचेतसः॥स
क्तुप्रस्थापरित्यागश्रद्धाजलदजन्मना॥यशोमहज्जलौघेनलोकास्तेप्लाविता:त्वया॥सफलंभव
तोजन्मब्राह्मण्यंसफलंचते॥गगनात्पुष्पवर्षंचपतितंतस्यमूर्धनि॥तेजःप्रज्ञाबलंधैर्यंश्रुत्राभ्रा
चातिदेहिनां॥योऽर्जयांतांजयातितेनस्वर्गोजितोभवेत्॥भार्यापुत्रःस्नुषासाधीतथैवात्माखुड
स्सजः॥सर्वाण्येतानिधर्मार्थंत्यक्तानित्क्षणत्वया॥नतथाप्रीयतेधर्मोदानैर्वैत्तैर्महाफलैः॥न्या
यलब्धैर्यथाह्यल्पैश्श्रद्धापूतैःस्तुतुष्यति॥अश्रद्धापरमंपापंश्रद्धापापप्रणाशिनी॥जहातिपापंश्र
द्धावान्जीर्णत्वचमिवोरगः॥बहुल्पश्रद्धयादत्तंपापमाहुर्मनीषिणः॥वार्यपिश्रद्धयादत्तंआनंत्या
योपकल्पते॥रंतिदेवस्तुधर्मात्माप्रुरानिःकिंचनोभवत्॥श्रद्धांदत्वासोनाकपृष्ठमितागतः
एकांदत्वासपारिक्यांतलकल्पाशोभवच्चिरं॥गवांशतसहस्राणिदत्वाप्यापिददौनृगः॥आत्ममांस

पूतःस्पदत्वापो

इति० २४

प्रदानेनशिबिरौशीनरस्तथा॥ सर्वडःखविनिर्मुक्तोमुमुदेदेववच्चिरं॥ नराजस्तैर्बहुभिरश्वमेधशतै

रपि॥ सक्तुप्रस्थस्यदानेनतुल्याएतेकथंचन॥ पश्यदिव्यंविमानंसंतव प्राप्तमिदंद्विज॥ नाकंगच्छस्वविप्रे

द्रसभार्यःससुतस्नुषः॥ ॥नकुलउवाच॥ ॥इत्युक्तःपरितुष्टेनसाक्षाद्धर्मेणसद्विजः॥ दिव्यंविमानमा

रुह्यसकुटुंबोदिवंययौ॥ ततोहंतेषुयातेषुबिलान्निःसत्वरः सौर्य॥ दिव्यपुष्पसमाकीर्णेसक्तुनायेनवेश्म

यन्॥ अथधर्मप्रसादेनमुनेस्तस्यचतेजसा॥ दिव्यपुष्पविमानेचहैमिपार्श्वमजायत॥ द्वितीयंतुकथं

पार्श्वहैमंस्यादितिचिंतयन्॥ तपोवनानितीर्थानियज्ञांश्चाप्यगमंसदा॥ ततोयज्ञमिमंश्रुत्वाधर्मराज

स्यधीमतः॥ आशयापरयाप्राप्तोनचकांचनतांगतः॥ ततःसमक्षंभवतांवाक्यमुक्तंमयाद्विजाः॥ सक्तु

प्रस्थेनवोनायंयज्ञस्तुल्यइतिद्विजाः॥ ॥वैशंपायनउवाच॥ ॥इत्येवंकथयित्वातुद्विजेभ्योनकुलस्त

था॥ ययौयथागतंराजन्तेपिविप्रागृहंययुः॥ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि॥ राजसूयेम २४

हायज्ञेयदाश्चर्यमभून्महत्॥ तस्मान्नविस्मयःकार्यस्त्वयायज्ञेषुपार्थिव॥ विनायज्ञेनमुनयस्तपोभि

स्त्रिदिवंगताः॥ अद्रोहःसर्वभूतेषुसंतोषःसत्यमार्जवं॥ सर्वेंद्रियक्षमाशांतिस्तपश्चस्वर्गसाधनं॥ ॥

इतिश्रीइतिहाससमुच्चयेसक्तुप्रस्थीयंनामषष्ठोध्यायः॥ ॥ ॥युधिष्ठिरउवाच॥ ॥केनमृत्युर्गृ

हस्थेनधर्ममाश्रित्यनिर्जितः॥ एतन्मेपृच्छतस्तातयथावद्वक्तुमर्हसि॥ ॥भीष्मउवाच॥ केनमृत्यु

र्गृहस्थेन अत्रैवोदाहरंतीममितिहासंपुरातनं॥ यथामृत्युर्गृहस्थेन धर्ममाश्रित्यनिर्जितः॥ इक्ष्वा

कुवंशजःश्रीमान्राजासीद्राजसत्तम॥ दुर्योधनइतिख्यातः सर्वैःसमुदितोगुणैः॥ तंनर्मदाख्यन

दीचकमेकामरूपिणी॥ तस्यांसजनयच्चापिकन्यामोघवतींतदा॥ सतयासहधर्मात्माकुरुक्षेत्रेव

सत्पुरा॥ मृत्युंगृहेतिजेष्यामिप्रतिज्ञामकरोत्तदा॥ ततःसधर्मवित्प्राहभार्यांतांधर्मचारिणीं॥ अतिथिः

प्रतिकूलंतेनकर्तव्यंकदाचन॥ अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्तते॥ सतस्मैदुष्कृतंदत्वापुण्यमा हरिः

दाति॰
२५

दायगच्छति॥सत्यंशौचंतपोधीतंदत्तमिष्टंश्रुतंतथा॥तस्यसर्वमिदंव्यर्थंअतिथिंयोवमन्यते॥दूरादति
थयोयस्यगृहमायांतिनिर्वृताः॥सर्वेहस्थ्यातिप्रोक्ताशेषान्येगृहरक्षकाः॥नपुराकृतपुण्यानांनरा
णामिहभामिनी॥त्रीण्येतान्युपपद्यंतेश्रद्धादानंतपार्थिनः॥तुष्टातिथौगृहस्थस्यतुष्टास्युःसर्वदेव
ताः॥विमुखेविमुखाःसर्वेभवंत्यत्रनसंशयः॥तस्मात्तोषयितव्योहिनित्यमेवत्वयातिथिः॥अथा
त्मनःप्रदानेननात्रकार्याविचारणा॥निःक्रांतेमयिकल्याणितथासंनिहितेगृहे॥नातिथिस्तेव
मंतव्यःप्रमाणंयद्यहंतव॥एतावानेवनारीणांधर्मःप्रोक्तोमनीषिभिः॥मनोवाक्कायभिःकार्यंप्रि
यंपतिहितंसदा॥कर्मणामनसावाचायास्त्रीपतिमनुव्रता॥भर्तृलोकमवाप्नोतिकीर्तिंचमहतींभु
वि॥तमब्रवीन्मोघवतीभर्तारंविनयान्विता॥नमेत्वद्वचनात्किंचिदकर्तव्यंमहाव्रत॥अहोतीवसभा
ग्योहंयस्यामेत्वंतपोधन॥धर्मानुपदिशस्येवंदुर्ज्ञेयानकृतात्मभिः॥भरणादपिभर्तामेपालना ॥२५

च्चपतिस्मृतः॥प्रीतिप्रदानात्सुखदःप्रज्ञादानाच्चधर्मदः॥धर्मकामार्थसस्तुत्राःकीर्तिर्लोभाश्चशाश्व
ताः॥यस्यप्रसादात्प्राप्यंतेकोन्योदेवस्ततोधिकः॥ ॥भीष्मउवाच॥ ॥अथमृत्युर्जिगीषंतमातिथ्ये
नसुदर्शनं॥एष्वतोन्वगमत्क्रुद्धोरंध्रान्वेषणतत्परः॥चिरंकदाचिदिध्मार्थंगतेतस्मिन्महात्मनि॥अ
तिथिर्ब्राह्मणोपेत्यनाम्नामोघवतींप्रति॥ ॥ब्राह्मणउवाच॥ ॥त्वदर्थमातिथिःप्राप्तस्त्वंकल्याणी
भजस्वमां॥प्रमाणंयदिधर्मस्तेगृहस्थाश्रमसत्तमा॥अतिथिःपूजितोयस्यध्यायतेमनसाशु
भं॥नतत्क्रतुशतेनापितुल्यमाहुर्मनीषिणः॥ ॥भीष्मउवाच॥ ॥ततःसाछंदयामासववोभिर्वहु
भिश्चतं॥नान्यमात्मप्रदानाच्चसवव्रेवरमीप्सितं॥सामत्वमस्यानिर्बंधंस्मृत्वाभर्तुश्चतद्वचः॥त
कीडितातेनसार्द्धंतुरहस्युमुरजेश्वभे॥अथेध्मांसमुपादायसपावकसुतस्तदा॥स्वाश्रमाद्वार
मागत्यतांभार्यांसमुपाह्वयत्॥ततःसाव्रीडितासाध्वीस्पृष्टाविप्रेणपाणिना॥उच्छिन्नास्मीतिवि

ज्ञाप्य भर्तुर्वाचं हि सा वदन्॥ उटजस्थं ततो विप्रस्तत्रुवातातिथिप्रियं॥ यथेष्टं रमयस्वैषा यस्मात्संवाग्रत
इद॥ अथास्मिन्नंतरे मृत्युस्तस्थौ चौ धर्म्यमुद्गरं॥ हीनप्रातिज्ञमत्रैव वाधिष्यामीति चिंतयन्॥ सुदर्श
नेन तं श्रुत्वा कर्मणा मनसा गिरा॥ त्यक्तेर्ष्या व्यक्तकोपश्च हृष्टात्मा वाक्रवीदिदं॥ ॥सुदर्शन उवाच
॥सुरतं वो द्विजश्रेष्ठ प्रीतिरेव परा मम॥ गृहस्थस्य परो धर्मः सर्वदातिथिपूजनं॥ अतिथिं पूजये
द्यस्तु श्रद्धया परया गृही॥ संप्रेत्यात्रिदिवं प्राप्य पूज्यते त्रिदिवैः समं॥ प्राणाश्च मम दाराश्च यदन्य
द्वियते वसु॥ अतिथिभ्यो मया देया मितिमे व्रतमाहितं॥ तथा च नान्यथा वाणीमहमेकामुदाहरेत्॥
सत्येनानेन मे देवाः पालयंतु अहर्निशं॥ ततोऽभवत्सु महान्नादो देवानां साधु साधु इती॥ पपात पुष्प
वर्षं च तस्य मूर्ध्नि महात्मनः॥ अथोटजाद्द्विजो निस्सत्य सावित्रः प्राह पावकीं॥ धर्मो हं द्विजरूपेण त्वां
जिज्ञासुरिहागतः॥ देवदानवगंधर्वा यक्षरक्षो महोरगाः॥ सर्वे न शक्ता यं जेतुं सोऽद्य कामस्त्वया

जितः॥ आत्मनः सदृशो येन सृष्टः कामरिपुर्जितः॥ सुदुर्जयो जितो मित्रः सुखमानंत्यमश्नुते॥ जितस्ते
दुर्जयश्चापि मृत्युर्लोकभयंकरः॥ क्रूर मुद्गर हस्तोऽपि यो सौ त्वानित्यमन्वगात्॥ स चापि कस्यचि
च्छक्तिस्त्रैलोक्ये पापचेतसः॥ पाप्तिव्रेनामिमां साध्वीं तव वा द्वीक्षितुं सुधतः॥ पावनार्थं च लोकानां श्रा
पेगषा भविष्यति॥ अर्द्धेनौघवतीनाम्ना चाम र्धेनानुयास्यति॥ भीष्म उवाच॥ ॥ततो वाजि सहस्रेण
विमानं युक्तमद्भुतं॥ ओघवत्या समारुह्य स स्वर्लोकं जगाम सः॥ एवं गृहाश्रमस्थेन कुर्वतातिथिपू
जनं॥ सुदर्शनेन राजेंद्र जितो मृत्युर्जितात्मनः॥ गृहस्थस्यातिथिर्धर्मो गुरुस्थस्यातिथिर्गुरुः॥
गृहस्थस्यातिथिर्देवो गृहस्थस्यातिथिर्गतिः॥ तस्मात्सर्वप्रयत्नेन गृहीणात्महितैषिणा॥ पूजनी
योऽतिथिर्नित्यं श्रद्धा दानेन देववत्॥ यद्दं श्रुणुयान्नित्यं पः पठेच्छ्रद्धयायुतः॥ सुदर्शनस्य चरितं
पुण्यां गतिमवाप्नुयात्॥ ॥इति श्री इतिहाससमुच्चये सुदर्शनोपाख्यानं नाम सप्तमोऽध्यायः॥ ॥

॥युधिष्ठिरउवाच॥ ॥कीदृशैःकर्मभिःप्रेत्यगच्छंतिनरकंनराः॥स्वर्गंवाकीदृशैस्नानस्तन्मेब्रूहिपिता
मह॥ ॥भीष्मउवाच॥ब्राह्मण्यंपुण्यमुत्सृज्यये द्विजालोभमोहिताः॥कुकर्माण्युपजीवंतितेवैनि
रयगामिनः॥पारित्यजंतियेदारांस्त्यक्त्वाश्चत्यातिथीस्त्वयः॥उच्छिन्नापितृदेवेज्यास्तेवैनि०॥प्राणि
नांप्राणहिंसायांनिरतायेनराःसदा॥स्वामिनांवंचकायेनते०॥कूपानांतलडागानांवापीनांचप
रंतप॥सरसांश्चैवहंतारस्ते०॥काष्ठैर्वाशंकुभिर्वापिस्तैरश्माभिरेवच॥यमार्गमवरुंधंतिते०॥स
र्वभूतेष्वविश्वस्ताःसर्वभूतेषुनिर्दयाःसर्वभूतेषुजिह्माश्चते०॥आशयापरयाप्राप्तंसंधुत्सृषाश्र
मकाशिनं॥येतिथिंनावमन्यंतेते०॥ब्राह्मणेभ्यःप्रतिश्रुत्यनप्रयच्छंतियेधनं॥येनिर्वेधप्रलापाश्च
ते०॥स्त्रीधनान्युपजीवंतियेनरास्त्रीजितास्तथा॥स्त्रियश्चैवनरक्षंतिते०॥शस्त्राणांयेचकर्ता
रःशाल्यानांधनुषांतथा॥विक्रेतारश्चराजेंद्रतेवैनिरयगा०॥मद्यपानरतानित्यंगीनवाघरता २७

तास्तथा॥घृतमांसरतानित्यंते०॥अयोनौचकुपानौचपशुयोनौचभारत॥समुत्सृजंतियेशुक्रं
तेवै०॥अनाथंविकलंदीनंरोगार्तंवृद्धमेवच॥येनानुकंपयत्यज्ञातेते०॥येतुगच्छंतिरागांधानरानारीं
रजस्वलां॥पर्वस्वचप्सुदिवाचैवते०॥येशरीरमलानग्नौप्राक्षिपंतिजलेथवा॥उद्यानेपाथिगोष्ठेच
ते०॥नियमान्स्वयमादाययेपश्चाद्जितेंद्रियाः॥विलोपयंतियेमूढास्ते०॥अज्ञात्वाधर्मशास्त्रा
णिप्रायश्चित्तंददंतिते॥अयथावच्चशास्त्रार्थान्मत्वातेनिरयंव्रजेत्॥इत्येवंकथिताराजन्नरानि
रयगामिनः॥स्वर्गलोकाश्चयेप्रोक्तास्तानप्येनान्निबोधमे॥सत्येननतपसाक्षांत्यादानेनाध्ययने
नच॥येधर्ममनुवर्तंतेतेनरास्वर्गगामिनः॥यज्ञहोमतपध्यानदेवतार्चनतत्पराः॥श्रद्धधानम
हात्मानस्ते०न०॥मातापित्रोश्चशुश्रूषांयेकुर्वंतिसदादृताः॥वर्जयंतिदिवास्वप्नंतेन०सर्वहिं
सानिवृत्ताश्चानित्यंसर्वसहाश्चये॥सर्वस्याश्रयभूताश्चतेन०॥शुश्रूषाभिस्तपोभिश्चज्ञात्वाचै

पसंपन्ना२

इति· २९ वनभारत।येप्रतिग्रहनिस्नेहास्ते०॥भयान्नापात्तथाशोकादारिद्र्याव्याधितस्तथा॥विमो चयंतितेजं
तूक्ते०॥आढ्याश्चरूपयौवनस्वरश्चभारत।येवैजितेंद्रियाधीरास्तेनरास्त्व०॥सुवर्णस्य चदातारोगवां
भूमेश्चभारत।अन्नानांपयसांचैवतेन०॥सहस्रपरिपोष्टारस्तथैवचशतस्यच॥पालकाश्चसहस्राणां
तेनरा०॥येयाचिताःप्रहृष्यंतिप्रियंदत्वावदंतिच॥त्यक्तदानफलेच्छास्तेते०॥स्वर्णानांरसधान्यानांरसा
नांचपरंतप॥स्वयमुत्पाद्यदातारस्ते०॥द्विषतामपियेदोषांनवदंतिकदाचन॥कीर्तयंतिगुणांस्तेषांते०
वापीकूपतडागानांप्रपानांदेववेश्मनां॥आश्रमाणांचकर्तारस्ते०॥असत्येष्वेवसत्याये ऋजवोनार्ज
वेषुच॥रिपुष्वपिहितैर्युक्तास्ते०॥येचदस्युभयत्रस्ताब्राह्मणागास्त्रियस्तथा॥स्वशक्त्यापरिरक्षंतिते०
आक्रोशंतंस्तुवंतंचतुल्यंपश्यंतियेनराः॥शांतात्मानोजितात्मानस्तेन०॥एकामप्युक्तुणदंशाश्चयेजंतु
षुदयान्विताः॥पुत्रवत्परिरक्षंतितेन०॥अर्थानांचयथोक्तेनविधिनासंचयंतिये॥सर्वद्वंद्वसहादां २९

तास्तेन०॥एतत्तेसर्वमाख्यातंमयातत्वेनपार्थिव॥दुर्गतिःसुगतिश्चैवप्राप्यतेकर्मणायथा॥ ॥इति
श्रीइतिहाससमुच्चयेस्वर्गनरकविचारोनामाष्टमोध्यायः॥ ॥युधिष्ठिरउवाच॥ ॥पितामहमहाप्रा
ज्ञसर्वशास्त्रविशारद॥शरण्यंपालयानस्यचोधर्मस्तंवदस्वमे॥ ॥भीष्मउवाच॥ ॥महाधर्मोक्षयप
कंशरणागतपालनं॥धर्मनिश्चयतत्वज्ञाएवमाहुर्मनीषिणः॥शिबिप्रभृतयोराजन्राजानःशरणाग
तान्॥परिपाल्यमहात्मानःपरांसिद्धिमितोगताः॥श्रूयतेहिकपोतेनशत्रुःशरणमागतः॥पूजितश्च
यथान्यायंस्वमांसैःश्चापितर्पितः॥ ॥युधिष्ठिरउवाच॥ ॥कथंकपोतेनपुराशत्रुश्शरणमागतः।
स्वमांसैःपूजितःकांचसपक्षीप्राप्तवान्गतिं॥ ॥भीष्मउवाच॥ ॥शृणुराजन्कथामेतांसर्वपापप्र
णाशिनीं॥नृपतेमुचुकुंदस्यकथितांभार्गवेणच॥कश्चित्क्षुद्रसमाचारःप्राणिनांकालसंमतः॥विचचा
रमहारण्येघोरःकुशानिलुब्धकः॥काककोकिलहंसांगोक्षवासासमान्वितः॥सदमध्यहृशग्रीवो

इति० २९ कृस्वरूपोमहोदरः॥नैवतस्यसुहृत्कश्चिन्नसंबंधीनबांधवः॥तैनैःसर्वैःपरित्यक्तस्तेनरौद्रेणकर्मणा॥
येन्नृशंसादुरात्मानःप्राणिनांप्राणहारकाः॥उद्वेजनीयाभूतानांव्यालाइवभवंतिते॥गतःकदाचित्
स्याथवनखंडस्याभवत्तदा॥पातयन्निववृक्षाग्रान्महावातसमुद्भवः॥मेघसंकुलमाकाशंविद्य
न्मंडलमंडितं॥संछन्नंहिमुहूर्तेननौसार्थेनवसागरः॥ततोधाराकुलेजातेसंभ्रमात्त्रातिविह्व
लः॥आससादवनेतस्मिन्मेघनीलंवनस्पतिं॥सेव्यमानंखगानीकैःछायावासफलार्थिभिः
॥धात्रापरोपकारायतंसाधुमिवनिर्मितं॥अथाभवत्क्षणेनैवंविपद्मिकतारकं॥महासर
द्वोत्फुल्लकुमुदःसरितोदकं॥सतत्रसंविवेशाथपर्णन्यास्तीर्यभूतले॥उच्चालुदेवतायात्र
नामहंशरणंगतः॥अथतस्यतरोस्कंधेकपोतस्त्वातिरोषितः॥भार्यांविरहयातांतुपर्यदेवयद्दुः
खिता॥ ॥कपोतउवाच॥ ॥वातवर्षोमहानासीन्नचागछतिमेप्रिया॥तयाविरहितंह्ये २९

तत्शून्यमेवगृहंमम॥पुत्रपौत्रैस्त्वथाभृत्यैराकीर्णमपिसर्वतः॥भार्याहीनगृहस्थस्यशून्यमेवगृहंस्मृतं॥ ३०
नगृहंगृहमित्याहुर्गृहिणीगृहमुच्यते॥गृहंविगृहिणीहीनंमरण्यसदृशंस्मृतं॥यदिसारक्तनेत्रांतात्रि
त्रांगीमधुरस्वरा॥नायागच्छतिमेकांतास्यजेहंजीवितंततः॥नभुक्तेमय्यभुक्तेचनस्नातेस्नातिसुव्रता
॥तिष्ठत्यातिष्ठमानेचशेतेशेतेचनोमयि॥हृष्टेमयिसुसंहृष्टादुःखितेमयिदुःखिता॥प्रोषितेदीनवद
नाक्रुद्धेत्वप्रियवादिनी॥पतिव्रतापतिप्राणापत्युःप्रियहितेरता॥यस्यस्यात्सदृशीनारीसधन्यः
पुरुषोभुवि॥वृक्षमूलेपिदयितायत्रतिष्ठतितद्गृहं॥प्रासादोपितयाहीनःकांतारादतिरिच्यते॥ध
र्मकामार्थकार्येषुभार्यापुंसांसहायिनी॥विदेशगमनेचास्यसैवविश्वासकारिणी॥नास्तिभा
र्यासमोबंधुःनास्तिभार्यासमःसखा॥नास्तिभार्यासमोलोकेनार्तस्यस्यातिभेषजं॥यस्यभा
र्यागृहेनास्तिसद्धत्वाप्रियवादिनी॥अरण्यंतेनगंतव्यंयथारण्यंतथागृहं॥एवंविलपमानस्यतु

त्वातिकरुणंबहु॥ गृहीत्वाशकुनिंश्येनकपोतीवाक्यमब्रवीत्॥ ॥कपोत्युवाच॥ ॥अहोतीवसभाग्या
हंयस्यामेदयितःपतिः॥असतोवासतोवापिगुणान्वर्णयतेहिते॥नसास्त्रीह्यभिमन्तव्यायस्याभर्ता
नतुष्यति॥तुष्टेभर्तरिनारीणांतुष्टाःस्युःसर्वदेवताः॥दावाग्निनेवनिर्दग्धासपुष्पस्तबकालता॥भ
स्मीभवतिसानारीयस्याभर्तानतुष्यति॥श्रृणुत्वावहितःकांतयत्तेवक्ष्याम्यहंहितं॥प्राणैरपित्वया
नित्यंसंरक्ष्यःशरणागतः॥एषवागुरिकःशेतेतववासंसमाश्रितः॥शीतार्तश्चक्षुधार्तश्चपूजा
मस्मैसमाचर॥योहिकश्चिद्द्विजंहन्याद्गांवालोकस्यमातरं॥शरणागतहंताचतुल्यंतेषांहिपा
तकं॥आगतोयोतिथिःसायंसूर्येस्तंगृहमेधिनां॥कालप्राप्तःस्वकालेवानास्यानश्नन्गृहेवसे
त्॥सर्वात्मनागृहस्थेनसंज्ञेयोतिथिरागतः॥सहितस्यपरोधर्मोउपधर्मोन्यउच्यते॥नचास्मै
त्वंकुरुद्वेषंमद्बंधनसमुद्भवं॥स्वकर्मणैवबद्धाहंप्राक्तनैःकर्मबंधनैः॥दारिद्र्यदुःखरोगापिवा ३०

पव्यसनानिच॥आत्मापराधवृक्षस्यफलान्येतानिदेहिनः॥नदातासुखदुःखानांनचहर्तास्तिकश्चन
॥स्वकृतान्युपभुंजंतेदुःखानिचसुखानिच॥परोदातेतिदुःखानांविद्वेषोत्रवृथानृणां॥रोगदुःखानि
तीव्राणितान्येषांकःप्रयच्छति॥तस्मात्त्वंदुःखमुत्सृज्यमद्बंधनसमुद्भवं॥धर्मेबुद्धिंसमादायपूजये
नंयथाविधि॥उपकारिषुयःसाधुःसाधुत्वेतस्यकोगुणाः॥अपकारिषुयःसाधुःससाधुःसद्भि
रुच्यते॥अपकारिष्वपिसदासाधुर्यःसाधुवर्त्तते॥छेत्तारमपिगंधेनसुखयत्येवचंदनः॥सतस्या
स्तद्वचःश्रुत्वाधर्मेभक्तिसमन्वितः॥उपगम्यततोहृष्टःकपोतःप्राहलुब्धकं॥ ॥कपोतउवाच॥ ॥
भद्रंतुस्वागतंतेद्यब्रूहिकिंकरवाणिते॥संतापोत्रनकर्तव्यःस्वगृहेवर्तसेभवान्॥अद्यश्रांतमविज्ञा
तंमातिथिंक्षुत्पिपासितं॥योनपूजयतेभक्त्यातमाहुर्ब्रह्मघातकं॥ब्रूहित्वंहिनिर्विशंकोयद्यत्त्वंव
क्तुमर्हसि॥तत्करिष्याम्यहंसर्वमाशोकंत्वंवृथाकृथाः॥ ॥भीष्मउवाच॥ ॥तस्यतद्वचनंश्रुत्वाप

इति·
३२

तुवाचविहंगमः॥कपोतःखलुशीघ्रंमेहिमत्राणंविधीयतां॥सगत्वांगारकर्माणंमानयामासपाव
कं॥ततःशुष्केषुपर्णेषुतमाशुसमदीपयत्॥सुसमिद्धंततःकृत्वातमहंशरणागतं॥प्रतापयस्व
विश्रांतत्वमंगान्यकुतोभयः॥सतथोक्तःस्तथेत्युक्त्वाव्याधोगात्राण्यतापयत्॥अग्निनाप्रगतप्रा
णस्ततमाहशरणागतं॥ ॥लुब्धक उवाच॥ ॥आहरंदेहिमेशीघ्रंमेषाक्षुन्मांप्रबाधते॥सतद्वचनंश्रु
त्वावाक्यमाहविहंगमः॥ ॥कपोत उवाच॥उत्तत्रानहिजीवामोवयंनित्यंवनेचराः॥सनास्तिवि
भवःकश्चियेनतेनाशयेक्षुधां॥निस्वस्वसाघोर्यदुःखमर्थिनश्चोपपद्यते॥यदितस्यप्रवता
दकःसजीवेदुःकरंततः॥युष्मांकुर्ष्कृतकर्माणंकृपणंव्यर्थजीविनं॥योयंधात्राविहितोकैर्येवक्तामो
दरंभराः॥सहस्त्रंभरतेकश्चिशतमन्येदशापरे॥ममत्वकृतपुण्यस्यकेवलात्मपिंडपूरः॥नाहं
सर्वजनाजीव्यःस्यामहंपक्वपादपः॥नवाहंदुर्बलोदीनःकेवलात्मपिंडपूरः॥नाहंसर्वजनाजी ३२

सुखेरतः॥पत्रपुष्पफलच्छायामूलवल्कलदारुभिः॥धन्यामहीरुहायेषांविमुखायांतिनार्थिनः॥एकस्मा
प्ततिथेरन्नंयत्सत्त्वमशाकिवान्नः॥तस्यानेकपरिक्लेशोगेहेकिंवसतःफलं॥तत्तथासाधयाम्येतच्छरीरंव्य
र्थजीवितं॥यथाह्यदोनवक्ष्यामिनास्तीत्यतिथिमागतं॥सांवनिंद्यैवमात्मानंतत्तसंलुब्धकंपुनः॥
उवाचतर्पयिष्येत्वांमुहूर्तंपरिपालय॥देवतानामृषीणांचसंवादेनपुनःपुनः॥श्रुतःपूर्वंमया
धर्मोनातिथेःपूजनात्परः॥सदृशाद्वाशयाप्राप्तःक्षुत्तृषाश्रमकर्षितः॥यःपूज्यतेतिथिःसम्यग
पपरुनुरेवसः॥ ॥भीष्म उवाच॥ ॥एवमुक्त्वासधर्मात्माप्रहृष्टेनांतरात्मना॥तमग्निंत्रिःपरि
क्रम्यप्रविवेशस्ववेश्मवत्॥ततस्तंलुब्धकोदृष्ट्वाकृपयाकृष्टरोदुःखितः॥कपोतमग्नौपतितंवा
क्यमेतदभाषत॥किमीदृशंनृशंसेनमयाकृतमबुद्धिना॥यावज्जीवमहंपापंहृदयंमेप्रधक्ष्यति
॥यःकरोतिनरःपापंनतस्यात्माध्रुवंप्रियः॥आत्मनोहिकृतंपापमात्मनैवहिभुज्यते॥पापांचि

शांति· तयतेयस्त्व्रवीनिचकरोति च॥सपापानिरतोमूढःपापयोनिषुजायते॥सोहंपापरतश्चैवपापात्मापरपर
३२ स्तथा॥पतिष्यामिमहाघोरेनरकेनात्रसंशयः॥क्षमयाभस्माविष्ठानयस्यनिश्चयमीदृशी॥सकाय
परपीडाभिर्धार्यतामितिकौतुकं॥कथंतेपापकर्माणोनराश्चात्रिषुवेष्टते॥मरणांतारितायेषांघोरा
नरकयातनाः॥अहोखलुकपोतेनसंदेहंसंप्रयच्छाति॥आतिथ्यधर्मःसुमहान्दर्शितोगृहमेधिनां
धिङ्मांदुष्कृतकर्माणंपापेषुध्यानिश्चये॥शुभंकर्मपरित्यज्ययोयंहिंसारतःसदा॥योहिंसकानि
भूतानिहिंसत्यात्मसुखेच्छया॥जीवंश्चैवमृतश्चैवनक्वचित्सुखमेधते॥अयंममनृशंसस्यकपो
तेनमहात्मना॥प्रयच्छतास्वमांसानिप्रसादेशःप्रदर्शितः॥अद्यप्रभृतिदेहंस्वंसर्वभोगविवर्जितं
तोयंस्वल्पमतिग्रीष्मशोषयिष्यामिसंशयं॥शीतवातातपसहःकृशोथमलिनस्तथाउपवासै
र्बहुविधैःश्चरिष्येव्रतमुत्तमं॥नापःपुनंतिपापानिनिनशेक्लानचाश्रमाः॥आत्मापुनंतिपापानि ३२

यदापापान्निवर्तते॥आत्मैवयदिनात्मानमहितेभ्योनिवारयेत्॥कोन्योहितारकस्तस्मादात्मानंवारयिष्य
ति॥ ॥भीष्म उवाच॥ ॥इत्थंधर्मप्रभावेणधर्मैकस्यसमागमात्॥धर्मेबभूवस्यमतिःपापस्यापियु
धिष्ठिर॥ततोयष्टींशलाकांचक्षारकंपंजरंतथा॥वभंजलुब्धकोदीनःकपोतींचमुमोचह॥लुब्धकेनत
तोमुक्तादृष्ट्वाग्नौपतितंपतिं॥कपोतीविललापार्तोशोकसंविग्नमानसा॥ ॥कपोत्युवाच॥नाहंते
शिद विप्रियंकांतकदापिसंस्मरे॥सभाग्यालभतेनारीगुणाढ्यंत्वादृशंपतिं॥पुष्पितेषुद्रुमाग्रेषुनदी
नांपुलिनेषुच॥कंदरेषुचशैलानांरमितादंतवप्रिया॥नकामयेद्यकिंनाथजीवितेनत्वयाविना॥
दीनायाःपतिहीनायाकिंभार्याजीवितेफलं॥मितंददातिहिपितामितंभ्रातामितंसुतः॥अमितस्यहि
दातारंभर्तारंकानपूजयेत्॥अपिकोटिसुवर्णाढ्याबहुपुत्रापिखेचर॥शोच्याभवतिसानारीपतिहीना
तपस्विनी॥गंधमाल्यैःस्तथाधूपैर्विविधैर्भूषणैरपि॥वासोभिःशयनीयेश्चविधवाकिंकरिष्यति॥

इति० ॥३२॥ वैधव्यसदृशंदुःखस्त्रीणामन्यनविद्यते॥धन्यासायोषितांमध्येस्त्रीयतेभर्तुरग्रतः॥कीदृशंनामतदुःखं
मतःकष्टतरंभवेत्॥भविष्यदपरंयन्मेप्राणानपारिहेष्यति॥नातंत्रीवाद्यतेवीणानाचक्रोविद्यतेरथः॥
नपतिःसुखमाप्नोतिनारीबंधुशतैरपि॥दरिद्रोव्यसनीवृद्धोव्याधितोविकलस्तथा॥वितनःकृपणो
वापिस्त्रीणांभर्तापरागतिः॥नास्तिभर्तृसमोबंधुर्नास्तिभर्तृसमागतिः॥नास्तिभर्तृसमोनाथो
नास्तिभर्तृसमःसुहृत्॥एवंविलप्यबहुशःकृपणाबहुदुःखिता॥पतिव्रतासुसंदीप्तंतमेवाग्निं
विवेशसा॥ततोदिव्यांबरधरंदिव्याभरणभूषितं॥दिव्यरत्नविमानस्थंभर्तारंसंददर्शसा॥
कपोतोपितलोदृष्ट्वाकपोतींदिव्यरूपिणीं॥हर्षेणमहतादृष्टःकपोतींवाक्यमब्रवीत्॥ ॥कपो
तउवाच॥ ॥अहोमामनुगच्छंत्यासाहतंसाधुशुभेत्वया॥क्षणमात्रेणदुःखेनसुखमानंत्यमा
र्जितं॥तिस्रःकोट्योर्धकोटिश्चरोमाण्यामानुषीस्मृता॥तावत्कालंवसेत्स्वर्गेभर्तारमनुयास्य ३२

स्यति॥व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात्॥तथास्त्रीपतिमुद्धृत्यसहतेनैवमोदते॥दुर्वृ
त्तंवासुवृत्तंवासर्वपापरतंतथा॥भर्तारंतारयत्येषाभार्याधर्मपुनिश्चिता॥एवमुक्त्वासधर्मात्मा
कपोतोभार्ययासह॥दिव्यंविमानमारुह्यप्रमुमुदेदेववच्चिरं॥लुब्धकोपिततोराजन्वैराग्यंपरे
मास्थितः॥महापंथानमाश्रित्यजगामदिशमुत्तरां॥त्यक्त्वाकामंभयंक्रोधंलोभंदंभमदंतथा॥
अहंकारश्चत्वयांचमानमत्सरमेवच॥सर्वदुःखसमोभक्त्वासमत्वेछस्थकांचनः॥अभयंस
र्वभूतेभ्योदत्त्वावाक्चित्तकर्मभिः॥एवंसकृत्वानिर्बंधानिर्द्वंद्वःसंजितेंद्रियः॥विवेशाथवनंघो
रंमहाव्यालसमन्वितं॥कंटकैश्चैवाभिन्नांगोलोहितार्द्रक्षतच्छविः॥अथोंतस्थेमहांस्तत्रवेणुसं
घर्षजोनलः॥सतद्वनंददाहाथयुगांताग्निरिवज्वलन्॥लुब्धकोभिमुखोगत्वाप्रहृष्टेनांतरा
त्मना॥ततस्तेनाग्निनादग्धःसंसद्यःक्षीणकल्मषः॥दिव्यंविमानमारुह्यजगामत्रिदशालं

इति०
२४

यं॥एवंखलुकपोतश्चकपोतीचपतिव्रता॥लुब्धकोगतवान्स्वर्गंधर्मेणवासुदुःकरं॥यान्याप्येवं
विधानारीभर्तारमनुगच्छति॥साभर्त्रासहिताःस्वर्गेकपोतीवविराजते॥युधिष्ठिरमहाराजस
र्वधर्मभृतांवर॥कथितस्तेमहाराजसर्वपापप्रणाशनः॥तस्मात्वमपिराजेंद्रधर्मेनिश्चितमानसः
॥सर्वभूतहितार्थायवरंधर्ममतंद्विज॥यइदंश्रृणुयान्नित्यंपुण्यमाख्यानमुत्तमं॥विमुक्तःसर्व
पापेभ्योनाकलोकंसगच्छति॥ ॥इतिश्रीइतिहाससमुच्चयेकपोताख्यानंनामनवमोध्या
यः॥ ॥युधिष्ठिरउवाच॥ ॥क्लिश्यमानेषुभूतेषुतेस्तेर्भावैर्यतस्ततः॥दुर्गाण्यतितरेद्येन
तन्मेब्रूहिपितामह॥ ॥भीष्मः॥ ॥आश्रमेषुयथोक्तेषुयथोक्तंवैद्विजातयः॥वर्त्तंतेसंजि
तात्मानोदुर्गाण्यतितरंतिते॥येनहिंसंतिभूतानिकर्मणामनसागिरा॥अनृशंसाम
हात्मानोदुर्गा०॥येग्निहोत्रपरानित्यंनित्यंचातिथिपूजकाः॥नित्यंस्वाध्यायशीलाश्चदु०॥ २४

यतुमानंदद्छंतिमानयंतिचयेपरान्॥व्यथंतिनापमानेनदु०॥धर्मार्थंजीवितंयेषांसंतानार्थंचमै
थुनं॥यज्ञार्थंभोजनंचैवदु०॥मातृवत्स्वसृवच्चापितथादुहितृवच्चये॥परदारेषुवर्त्तंतेदु०॥स्तेन्येणवर्त्तमा
नस्वयेनयाचंतिकिंचन॥संतोषात्सहितावीरादु०॥बहवेषुचयेशूराःसत्कामरणजंभयं॥धर्मेणजय
मिच्छंतिदु०॥येतपांसिप्रतप्यंतेकौमारव्रतचारिणः॥जितेंद्रियाजितक्रोधादु०॥येभ्योनकश्चित्त्रस्ये
तनत्रस्यंतिकुतश्चये॥येषामात्मसमोलोकोदु०॥येपापानिनकुर्वंतिकर्मणामनसागिरा॥धर्मे
णैकात्मनस्तेदुर्गा०॥येनिस्पृहापरस्वेभ्यःकर्मणामनसागिरा॥परस्त्रियानपश्यंतिदु०॥नि
र्वृत्तायेचमांसेभ्योपिष्टमांसेभ्यएवच॥निर्वृत्ताचैवमद्येभ्योदुन्येवदंतीहिंसनेनप्राणत्यागेव्यव
स्थिते॥प्रमाणभूताभूतानांदु०॥दुर्बलार्थंबलंयेषामर्थोदानार्थएवच॥अवस्थंमधीतंचदु०॥प
रैःपरिगृहीतंयैस्तपाममप्यरवीगतं॥काष्टंवानोपगृह्णंतिदु०॥अनादिनिधनंदेवंजगतःप्रभवाव्यये

इति
३५

भक्तिर्नारायणे येषां दु०॥ मंगल्यमंगले चैव सर्वपापप्रणाशने॥ भक्त्या त्रिविक्रमे देव दु०॥ दुःस्वप्ने वर्तते नमो धा
रे धर्माधर्मज्ञ के तथा॥ क्रोधपंके मदग्राहे लोभबुद्बुदसंक्षये॥ ज्ञानगंभीरपाताले सत्यज्ञानविष्टरबिले॥ स
ऽनंतनारस्य सेवा विष्णुः संसारसागरात्॥ दुर्गातितरणं चेदं ये पठंति सदा दृताः॥ श्रावयंति च विप्रांश्च दु
र्गाण्यतितरंति ते॥ एतत्ते सर्वमाख्यातं दुर्गातितरणं मया॥ यथा तरंति दुर्गाणि कर्मभिः प्रेत्य मानवाः
॥ ॥ इति श्रीइतिहाससमुच्चये दुर्गातितरणं नाम दशमोऽध्यायः॥ ॥ युधिष्ठिर उवाच॥ किमर्थं
ति क्लिश्यमाना वै ब्राह्मणाः शंसितव्रताः॥ न राज्ञः प्रतिगृह्णंति तन्मे ब्रूहि पितामह॥ भीष्म उवाच॥
राजानः पापशीला राजन् राज्यैश्वर्यमदान्विताः॥ स्वधर्मे नावतिष्ठंति संतस्तान् वर्जयंत्यतः॥ अत्रे
वोदाहरंतीममितिहासं पुरातनं॥ वृषादर्भेश्च संवादं ऋषीणां चैव भारत॥ कश्यपोऽत्रिर्वसिष्ठश्च भा
रद्वाजोऽथ गौतमः॥ विश्वामित्रो जमदग्निश्च साध्वी चैवाप्यरुंधती॥ सर्वेषामेव चैतेषां गंडाभूत्प ३५

रिरक्षका॥ पशुसखश्चैव तस्या भर्ता बभूव ह॥ ते च सर्वे तपस्यंतः पुरा चेरुर्महीमिमां॥ समाधिनाऽभिजि ३६
गीषंतो ब्रह्मलोकं सनातनं॥ अथाभवदनावृष्टिः कदाचिन्महती तदा॥ कृच्छ्रप्राणोऽभवत्तत्र सर्वलोकः
क्षुधान्वितः॥ ततो निरशने लोके आत्मप्राणपरीप्सवः॥ मृतं किशोरमादाय कृच्छ्रप्राणास्तदापचन्॥
अथ कर्मचरास्तत्र क्लिश्यमानान् महितान् ऋषीन्॥ दृष्ट्वा राजा वृषादर्भी प्रोवाचेदं वचस्तदा॥ वृषाद
र्भिरुवाच॥ ॥ प्रतिग्रहो ब्राह्मणानां सृष्टा वृत्तिरनिंदिता॥ तस्मात्प्रतिग्रहं युक्तो गृह्णीध्वं मुनिसत्त
माः॥ पुमान् ग्रामान् व्रीहियवान् रसान् रत्नानि कांचनं॥ दास्यामि सर्वमेतद्वो भक्षयध्वं शवं समम॥
ऋषय ऊचुः॥ ॥ राजन् प्रतिग्रहो राज्ञो मध्वास्वादो विषोपमः॥ तज्जानन्वा स्म कस्मात्त्वं कुरुषे विप्रलं
भनं॥ दशसूनासमश्चक्री दशचक्रीसमो ध्वजी॥ दशध्वजीसमा वेश्या दशवेश्यासमो नृपः॥ दश
सूनासहस्राणि यो वाहयति सूनकः॥ तेन तुल्यो भवेद्राजा घोरस्तस्य प्रतिग्रहः॥ यो राज्ञः प्रतिग

३६
३५०

इति० ३६

ज्ञातिब्राह्मणोलोभमोहितः॥ ॥नमिस्रादिषुघोरेषुनरकेषुनपच्यते॥ तस्मच्छकुशलंतेस्मसहदानेनपा
र्थिव॥ अर्थिभ्योदीयतामेतद्दसुत्कानेसमायधुः॥ अथराज्ञःसमादेशान्नगत्वातत्रखुमंत्रिणः॥ औ
दुंबराणिप्रकिरन्हेमगर्भाणिभूतले॥ ततान्यानिविचिन्वंतस्तेगृह्णंस्तत्रतान्यपि॥ गुरूणीतिवि
दित्वातुनग्राह्याण्यत्रिरब्रुवन्॥ ॥अत्रिरुवाच॥ ॥नास्महेमूढविज्ञानानास्मरेमंदबुद्धयः॥ है
मानिमानिजानीमःप्रतिबुध्यास्मजागमः॥ दत्वेनतदुपादानप्रेत्यस्यात्कटुकोपमं॥ तस्मान्नग्रा
ह्यमेवैतत्शुभमानंसमिच्छता॥ यत्पृथिव्यांव्रीहियवान्हिरण्यंपशवस्त्रियः॥ नालमेकस्यतत्सर्वंद्र
तिमत्वाशमंगतः॥ ॥वसिष्ठउवाच॥ ॥धर्मार्थंसंचयोयस्यद्रव्याणांनप्रशस्यते॥ तपःसंचय
एवेहिविशेषोद्रव्यसंचयात्॥ त्यजतःसंचयान्सर्वान्यांतिनाशमुपद्रवाः॥ नाहिसंचयवान्क
श्चिद्दृश्यतेनिरुपद्रवाः॥ यथायथानिगृह्णातिब्राह्मणोसत्प्रतिग्रहं॥ तथातथास्यसंतोषाद्ब्रह्म ३६

तेजोविवर्द्धते॥ अकिंचनत्वंराज्यंचतुलयासमतोलयन्॥ अकिंचनत्वमधिकंराज्यादपिजितात्मनः॥ कश्य
पः॥ ॥अनर्थोब्राह्मणस्यास्यपदर्थनिचयोमहान्॥ अर्थैश्वर्यविमूढोहिश्रेयसोभ्रस्यतेद्विजः॥ अर्थसं
पद्विमोहायविमोहोनरकायच॥ तस्मादनर्थमर्थाख्यंश्रेयोर्थीदूरतस्त्यजेत्॥ यस्यधर्मार्थमर्थेहातस्या
नीहैवशोभना॥ प्रक्षालनाद्धिपंकस्यदूरादस्पर्शनंवरं॥ योर्थेनसाध्यतेधर्मःसक्षयिष्णुःप्रकीर्तितः॥
यःपरार्थपरित्यागःसोक्षयोमुक्तिलक्षणः॥ ॥भारद्वाजउवाच॥ ॥जीर्यंतिजीर्यतःकेशादंताजीर्यं
तिजीर्यतः॥ चक्षुश्श्रोत्रेचजीर्यंतितृष्णैकातरुणायते॥ सूच्यासूत्रंयथावस्त्रेसंधारयतिधारकः॥ तद्व
त्संसारसूत्रंहितृष्णासूच्यानिबध्यते॥ यथाश्रृंगंरुरोःकालेवर्धमानस्यवर्धते॥ तथैवतृष्णावित्तस्यव
र्धमानस्यवर्धते॥ अनंतपारादुःपारातृष्णादुःखशतावहा॥ अधर्मबहुलाचैवतस्मात्तांपरिवर्जयेत्॥ ॥
गौतमः॥ ॥संतुष्टःकोनशक्नोतिफलैर्मूलैश्चवर्तितुं॥ सर्वस्त्विंद्रियलोभेनसंकष्टान्यवगाहते॥ सर्व

द्रौति॰ ३८ त्रसंपदस्तस्यसंतुष्टंयस्यमानसं॥उपानद्गूढपादस्यननुचर्मावृतेवभूः॥संतोषामृततृप्तानांयत्सुखं
शांतचेतसां॥कुतस्तद्धनलुब्धानामितश्चेतश्चधावतां॥असंतोषःपरंदुःखंसंतोषःपरमंसुखं॥तस्मा
त्सुखार्थीपुरुषःसंतोषःसततंभवेत्॥ ॥विश्वामित्रः॥ ॥कामंकामंयतस्तस्ययादिकामोनासिध्यति
अथैनमपरःकामोभूयोविध्यतिबाणवत्॥नजातुकामाःकाम्यानांमुपभोगंनासिध्यति॥हविष्या
कृष्णवर्त्मेवभूयएवाभिवर्धते॥ ॥जमदग्निः॥ ॥प्रतिग्रहसमंयोवैतपोवर्धयेन्महत्॥तत्तपोब्राह्म
णस्येहधनलोभात्परिश्रवेत्॥योर्थंप्राप्यनृपाद्विप्रःशोचितव्योग्रहीष्यति॥साविनश्यतिमूढात्मानर
केपातनाभवेत्॥प्रतिग्रहसमर्थोयोनादत्तेयःप्रतिग्रहं॥सएववदतेधर्मंसएवप्रतिपद्यते॥ ॥अरुंध
त्युवाच॥ ॥बिसतंतुर्यथानित्यमंतस्थःसततंविशेत्॥तृष्णातंतुरनाद्यंतस्तथादेहगतःसदा॥यदुस्त्य
जादुर्मतिभिर्यानजीर्यतिजीर्यतः॥योसौप्राणांतकोरोगस्तांतृष्णांत्यजतःसुखं॥ ॥चंडोवाच॥ ॥ ३८

उग्रात्पतोभयात्तस्माद्विभ्यंतेमीमुनीश्वरात्॥बलीयांसोमीदुर्बलवत्तोतीवबिभेम्यहं॥पशुसखउवा
च॥ ॥यदाचरंतिविद्वांसःसदाधर्मपरायणाः॥तदेवविदुषाकार्यमात्मनोहितमिच्छता॥ ॥भीष्मउवा॰॥
इत्युक्त्वाहेमगर्भाणिस्वक्तानानिफलानिच॥ऋषयोजग्मुरन्यत्रसर्वएवदृढव्रताः॥ततस्तेविचरंतोन
वनेमूलफलाशिनः॥ददृशुःसहसाग्रामंपरिव्राजंशुनःसखं॥तेनैवसहितास्सर्वेगत्वाकिंचिद्वनांत
रं॥सरःपश्यन्सुविस्तीर्णंपद्मोत्पलदलावृतं॥ततोवतीर्यदृष्ट्वाच -- तेविकलापशः॥तीरेनिक्षि
प्यसरसःश्चक्रुःपुण्यजलक्रियां॥अथोत्तीर्यजलात्तस्मात्तेसमेताःपरस्परं॥विलोपितान्यपश्यंत
इदंवचनमब्रुवीत्॥केनक्षुधाभितप्तानामस्माकंपापकर्मणा॥नृशंसेनापनीतानिबिसान्याहाराकां
क्षिणां॥निशंकमानास्त्वन्योन्यंपप्रच्छुर्द्विजसत्तमाः॥चक्रुःसशपथान्सर्वेनिश्चयंप्रतिभारत॥अत्रिरुवा
च॥ ॥असंतोषश्चभवतुदृष्ट्वादीनांपरश्रियं॥अकार्येचप्रवर्तेतबिसस्तैन्यंकरोतियः॥आत्मार्थम

इति० ३८ त्वंपचतु स्यस्काश्च त्यानिथिंस्तथा ।।लोभेनहिंसमश्नातु बिस० ।।अधीत्यवेदांस्त्यजतु स्त्रीमाग्निनपिविच्य
तु ।।कृजंजयतु वादेन विसस्तै० अन्तलौमैथुनंयातु दिवास्वापंनिषेवतु ।।क्रूरसाक्षीत्वमभ्येतु बिससै० ।।
अन्ततंवदतु ब्रात्यं बन्धुष्येनोपजीवतु ।।ददतु कन्यांशुल्केबि० ।। ।।कश्यपउवाच ।। ।।दंभेनधर्मंचरतु राजा
नंचोपजीवितु ।।मधुमांसंचसोश्नातु बिस० ।।उदपानद्रुवेग्रामे ब्राह्मणो वृषलीपतिः ।।तस्यसालोक्य
तांयातु बि० ।।भारद्वाजउवाच ।। ।।नृशंसः सोस्तु सर्वेषां समंद्विंशोप्रहंकृतः ।।मत्सरीपिशुनश्चैव
बिस० ।।विष्णुं ब्रह्मण्यदेवेशं घोरदानवमर्दनं ।।त्रैलोक्यस्थितिसंहारस्य हेतुमतीश्वरं ।।आधाता
रंविधातारंसंधातारंजगद्गुरुं ।।त्वंविहायभजतु अन्यं बिस० ।। ।।वसिष्ठउवाच ।। ।।इतिहासकथांश्च
पठन्निद्रापरवशोस्तु सः ।।विक्रीणातु रसांश्चापि वि० ।।अतिथिस्त्यजतु घातंपाकभेदंकरोतिसः ।।श्र
द्धान्नंचसदाश्नातु बि० ।।श्रुत्वासर्वाणिशास्त्राणि पुनःपापंनिषेवतु ।।त्यागशक्तिविहीनोस्तु वि० ३८

।।गौतमउवाच ।। ।।दत्त्वादानंकीर्तयतु भार्ययाचोपजीवतु ।।एकाकीमिष्टमश्नातु बिस० ।।विश्वासघात
कः सोस्तु वंचनातत्परः सदा ।।क्रूरकर्मरतः सोस्तु विस० ।।विष्णुभक्तिपरो नस्याद्विष्णुभक्तिपराङ्मुखः ।।
धर्मनिंदपरः सोस्तु बिस० ।। ।।विश्वामित्रउवाच ।। ।।नित्यंकामरतः सोस्तु दिवासेवतु मैथुनं ।।नित्यं
च पातकः सोस्तु बि० ।।परापवादंवदतु परदारांश्चसेवतु ।।परस्वामिहरः सोस्तु बिस० ।।जमदग्निः ।।
मातरंपितरंचैवसोवमन्यतु दुर्मतिः ।।श्वश्रुरांतस्यवृत्तिस्याद्विस० ।।देवनिंदपरःसोस्तु द्विजनिंदाप
रस्तथा ।।पशुपीडापरः सोस्तु बिस० ।।चौर्यकर्मरतः सोस्तु चौर्याणांचैवसूचकः ।।मिथ्यानुशापं
वदतु बि० ।।वेदनिंदापरः सोस्तु वेदाविक्रयकस्तथा ।।राजनिंदापरः सोस्तु बि० ।।परपाकंसदाश्ना
तु रसभंगंकरोतु सः ।।परान्नंचसदाश्नातु बि० ।।अरुंधत्युवाच ।। ।।परवादपरासास्तु पररूपण
तत्परा ।।परवेश्मरतासास्तु बि० ।।भर्तारंभर्त्समित्राणि हतु हृदंभर्त्स्वबांधवं ।।परिभूयस्वयंभुंक्ते

इति० ३९

बिस०॥ चंडोवाच॥ ॥स्वामिनः प्रतिकूल्यास्तुसेयमस्य करोतु च॥ देवतास्वनमस्कारादिबि०॥ श्रद्धावेमे
तुयानारीश्रद्धाणांदास्यमिच्छतु॥ श्रद्धप्रेष्यकरीसास्तुबिस०॥ पशुसरवउवाच॥ ॥न्यनङ्गाति
परप्रेष्यः सोभ्यन्नमान्तिजन्मनि॥ सर्वधर्मक्रियाहीनोबिस०॥ पुरागछतुविप्राणांमार्गदानंच
वर्जयेत॥ त्रीणियोगंवचयतु० ॥शुनःसखउवाच॥ ॥न्वेयेनवदाम्यैतेगृहस्थस्तुदयापरः
॥सत्यंवदतुवाऽऽत्तांबि०॥ अग्नीपास्तुविधिवधन्वीभवतुनित्यशः॥ ब्राह्मणःसद्मांपालुबि०
अध्यात्मविधानिरतोविषयेष्वतिनिस्पृहः॥ सर्वद्वंद्वःसहोदांतःसमलोष्टाश्मकांचनः॥ एकाकी
परमार्थज्ञःपराहिंसाविवर्जितः॥ ब्रह्मसायुज्यमाप्येत्याबि०॥ ऋषयऊचुः॥ इष्टमेतद्द्विजातीनांयो
यंतेशापथःकृतः॥ त्वया कृतंबिसस्तैन्यंसर्वेषांनंशुनःसखा॥ ॥शुनःसखउवाच॥ मयास्यं
तंहृतान्यासान्बिसानीमानिभोद्विजाः॥ धर्मवैश्रोतुकामेनजानीध्वमांहिवासवं॥ अलोभाद ३९

क्षयालोकाजितावमुनिसत्तमाः॥ विमानान्यधिरूढ ध्वंगच्छामस्त्रिदशालयं॥ भीष्मउवाच॥ ॥
ततोमहर्षयस्तेतुविज्ञायात्रिदशाधिपं॥ तेनैवसहिताःसर्वेतदाजग्मुःस्त्रिविष्टपं॥ राजन्नातियहं
घोरंजानंतोमुनिपुंगवाः॥ यश्वपित्वाविसंयालानातिक्षुत्क्षुजडीकृताः॥ यदिदंशृणुयान्नित्यंमषी
णांचरितंमहत॥ विमुक्तःसर्वपापेभ्योनाकलोकंसगच्छति॥ ॥इतिश्रीइतिहाससमुच्चयेसप्तर्षि
संवादोनामएकादशोध्यायः॥ ॥युधिष्ठिरउवाच॥ ॥पापस्यकिमधिष्ठानंकाप्रसूतिश्चभा
रत॥ किंवास्यकारणंप्रोक्तंतन्मेब्रूहिपितामह॥ ॥भीष्मउवाच॥ ॥लोभप्रतिष्ठापापस्य
प्रसूतिर्लोभएवच॥ अत्रतेसंशयोमाभूल्लोभःपापस्यकारणं॥ लोभात्क्रोधःप्रभवतिलोभा
द्रोहःप्रवर्तते॥ लोभान्मोहश्चमायाचमानंमात्सर्यमेवच॥ नायंपूरयितुंशक्योलोभोवर्द्धिते
रपि॥ नित्यंगंभीरतोयाभिरापगाभिरिवार्णवः॥ अष्टौदिशःसमुद्राश्चद्वीपानश्चन्सुरस्वा:

इति॰
४०

तुतोषनैवरत्नानांलोभादितिविनिश्चितं॥ सर्वभूतेष्वपि ध्वस्ताः सर्वभूतेषुनिर्दयाः॥ सर्वभूतेषुजिह्मा
श्चलोभाद्भवंतिभारत॥ उत्सन्नेयदाभक्तिर्विष्णुपादांबुजाश्रया॥ तदालोभः क्षयंयातिसातुपुंसां
सुदुर्लभा॥ सुमहत्स्वपिशास्त्राणिधारयंतिबहुश्रुताः॥ छेत्तारः संशयानां चलोभग्रस्ताव्रजंत्यधः
लोभक्षयेक्षयंयांतिसर्वपापानिदेहिनां॥ लोभवृद्धौचवर्धंतेनृपतेनात्रसंशयः॥ यदालोभक्ष
यंयातियांतिनाशमुपद्रवाः॥ तथैवजायतेतेषांधर्मबुद्धिःसुदुर्लभा॥ धर्मार्थकाममोक्षाणांच
तुर्णामिहसाधनं॥ धर्ममेवपरंप्राहुर्मुनयस्तत्वदर्शिनः॥ नचास्तिधर्मसंबंधोलोभक्रांतस्य
देहिनः॥ सएवधर्मविध्वंसीलोभःपरमदारुणः॥ तस्मात्सर्वप्रयत्नेनत्यजलोभंयुधिष्ठिर॥
यदीच्छसिमहाराजशाश्वतींगतिमात्मनः॥ विनष्टलोभाविषयेषुनिस्पृहाः प्रसन्नचित्ताः
परिहीनमत्सराः॥ व्रजंतिविष्णोःपरमेवतत्पदंसनातनंयत्प्रवदंतिसंतः॥ ॥इतिश्रीइतिहा ४०

ससमुच्चयेलोभप्रकरणंनामद्वादशोध्यायः॥ ॥युधिष्ठिरउवाच॥ ॥शमस्य प्रसोवापिकिं
तुश्रेयस्करंपरं॥ एतन्मेसंशयंतातयथावद्वक्तुमर्हसि॥ ॥भीष्मउवाच॥ ॥विविधाहिगतिःप्रोक्ता
धर्मस्येहमनीषिभिः॥ स्वंस्वंविज्ञानमाश्रित्यशमस्तेषांपरायणं॥ शमःपवित्रमतुलंशमःपुण्य
मनुत्तमं॥ शमःसुखमसंख्येयंशमःपापहरःस्मृतः॥ अत्रैवोदाहरंतीममितिहासंपुरातनं॥ तुला
धारस्यसंवादंजाजलेश्चमहात्मनः॥ पुरावैसागरोपांतेजाजलिर्नामतोद्विजः॥ तपस्तेपेमहा
घोरंवायुभक्षःसमाहितः॥ तस्यवर्षाण्यनेकानिस्थाणुभूतस्यतिष्ठतः॥ कुलिंगशकुंतकावे
नीडंशिरसिचक्रतुः॥ ततोदयावान्ब्रह्मर्षिरुपप्रैक्षततदंपती॥ ततस्तौसुखविश्वस्तौतत्रांडानिवि
मुंचतां॥ अंडेभ्यस्तथपुष्टेभ्योव्यजायंतशकुंतकाः॥ ववर्धंताथतत्रैवजनचालतुजाजलेः॥
कदाचिज्जातपक्षास्तेसमुत्पत्यविहंगमाः॥ नैवजग्मुर्महाराजततःसंभ्रमयोद्विजः॥ अथासौ

विस्मयाविष्टःप्रोवाचनमयासमः॥लोकेस्मिन्नतपसाकश्चित्ततःखेवाक्यमब्रवीत्॥वाराणस्यां
निवसानितुलाधारोमहामतिः॥सोप्येवंनक्षमोवक्तुंयथात्वंभाषसेद्विज॥एतच्छ्रुत्वामहर्षिस्तुतु
लाधारदिदृक्षया॥अचिरेणैवकालेनप्राप्तोवाराणसीपुरीं॥तत्रापश्यत्तुलाधारंविक्रीणंतंर
सान्बहून्॥तुलाधारस्ततंदृष्ट्वाप्रत्युत्थायाब्रवीदिदं॥ ॥तुलाधारउवाच॥आयातश्चासिविदि
तोमयात्वंद्विजसत्तम॥येनेहागमनेकार्यंतदप्यवगतंमया॥तपस्तेपेसुनेमहान्मूर्ध्निजाताःश
कुंतकाः॥ततस्त्वंविस्मयाविष्टःखेवागुक्तोसिमांप्रति॥तांसश्रुत्वामहर्षेत्वंमादिदृक्षुरिहागतः
तद्ब्रूहिद्विजश्रेष्ठप्रियंकिंकरवाणिते॥जाजलिरुवाच॥ ॥विक्रीणीतःसर्वरसान्सर्वगंधां
श्चनित्यशः॥कथंवैनैष्ठिकोधर्मोविदितस्तद्वदाशुमे॥ ॥तुलाधार०॥नमेधीतानिशास्त्रा
णिनोपास्ताश्चापिदेवताः॥पूर्वाभ्यासादयंधर्मोविप्रजाजलेभून्मम॥कर्मणामनसावाचा

यत्रिसंसेवतेनरः॥तदभ्यासोद्भवस्त्वेनंमातेभूदत्रसंशयः॥योदुःखितानिदृष्ट्वाभवामिदुःखितः॥सु
खितानिसुखीवापिसधर्मस्त्वहनैष्ठिकः॥अद्रोहेणैवभूतानांकर्मणामनसागिरा॥यावर्तितःस
परोधर्मस्तेनजीवामिजाजले॥परिछिन्नैःकाष्ठतृणैःमयेदंमंदिरंकृतं॥तथैवशरणंविष्णोः
कृतंवित्तानुसारतः॥अन्येषामपिदेवानांब्राह्मणानांगवांस्तथा॥करोमिनित्यंशुश्रूषापापापां
डानामुपेक्षकः॥यद्ददामिनतन्न्यूनंयत्कृह्णामिनचाधिकं॥विक्रीणामिरसांश्चाहंमद्यवर्जममा
यया॥यःकरोतिजडांधानांवणिक्कर्मत्रिवर्तनं॥सयातिनरकंघोरंधनंतस्यापिहीयते॥स
र्वेषांयःसुहृन्नित्यंसर्वेषांचहितेरतः॥कर्मणामनसावाचासधर्मंवेदजाजले॥यस्मादुद्वि
जतेलोकाःसर्वेमृत्युमुखादिव॥प्रायशःकर्मभिःपुंसांसपापांगतिमाप्नुयात्॥नाहंपरेषां
कर्माणिनचनिंदामिनोमिवा॥समोस्मिसर्वभूतेषुपश्यमेजाजलेव्रतं॥यथापंग्वंधबधिराः

बाम्ह्रकाजडादयः॥दैवेनविहितायेस्तेरूपमाविषयेषुच॥यथावद्गालुरक्तशानिस्पृहाविषयान्वापि
॥तथार्थकामभोगेषुममापिविगतास्पृहा॥तुल्यमित्रिपक्षस्यतुल्यनिंदाप्रशंसिनः॥तुल्यामेसर्व
भूतेषुबुद्धिस्तिष्ठतिजाजले॥सर्वभूतात्मभूतस्यसर्वंसर्वत्रपश्यतः॥देवापिमार्गेमुह्यंतिअपदस्य
पदैषिणः॥यदानकुरुतेपापंसर्वभूतेषुमानवः॥कर्मणामनसावाचब्रह्मसंपद्यतेतदा॥यस्मात्ति
यश्चमांद्वेष्टितानुस्मावपिमेसमौ॥रागद्वेषविहीनस्यनहिमेतौप्रियाप्रियौ॥सर्वानद्यःसरस्व
त्यःसर्वेपुण्याःशिलोच्चयाः॥शमोहिजाजलेतीर्थंमात्मन्तेसंशयोभवेत्॥शमएवपरंतीर्थंशम
एवपरंतपः॥शमएवपरंज्ञानंशमोयोगपरस्तथा॥ब्रह्मचारीगृहस्थश्चवानप्रस्थश्चभिक्षुकः
॥सर्वएवशमेनैवप्राप्नुवंतिपरांगतिं॥दानंमिथ्यातपःशौचंतीर्थविदाश्रुतंतथा॥अशांतमनःपुंसः
सर्वमेतदनर्थकं॥शमार्थेसर्वशास्त्राणिविहितानिमनीषिभिः॥तस्मात्सर्वार्थशा[illegible]ोयस्याशां ४२

तमनःसदा॥यत्कृतंमविरागायनधर्मायनशांतये॥सुष्टुत्तमपिशब्देनकाकभाषितमेवतत्॥एता
न्धर्मान्नतुलाधारःकथयित्वातुजाजले॥ततोस्यदर्शयामाससमीपस्थान्शकुंतकान्॥एतेश
कुंतकाविप्रसंजातानाम्रभ्रियतत्व॥आह्वयैनान्द्विजश्रेष्ठत्वमेषधर्मनःपिता॥ततोजाजलिनाते
नसमाहूताःशकुंतकाः॥वाचंप्रत्याहरंदिव्यांधर्मस्यवचनात्किल॥ ॥शकुंतकाऊचुः॥त्यज
स्वदर्पमिमांविप्रआत्मानंविस्मयंगतः॥शममेवसमाधत्स्वततोयास्यसितत्परं॥सुखदुःख
र्जितंयत्तेतपःक्षरतिविस्मयात्॥तपसिक्षस्तिविप्रनप्राप्स्यसिपरांगतिं॥तस्मात्स्मयंपरित्य
ज्यतपसःक्षयकारणं॥शमेमनःसमाधायध्यानयोगपरोभव॥चीरवाजटीवापित्रिदंडीमुं
डएवच॥तथाक्लेशापविद्धेंद्रियस्यशांतंनमानसं॥भाषितोपिचरेद्धर्मंयत्रतत्राश्रमेरतः॥
शमःसर्वेषुभूतेषुनलिंगंधर्मकारणं॥वयंस्नेहादिहप्राप्तास्तवधर्मादिदृक्षवः॥शांतोभवस्व

शांति ४३

जस्य ह्रीमिरुक्कास्तेयदुःखगाः॥भीष्मउवाच॥ ॥एवंतैरनुशास्तोसौकुंडधारेण सद्विजः॥शम
मास्थायनियतोजगामपरमांगतिं॥तस्माद्धि द्विमहाराजतपसःशममुत्तमं॥तपस्वीस्वर्गमा
प्नोतिशांतात्मा ब्रह्मणःपदं॥वनेपिदोषाःप्रभवंतिरागिणां गृहेपिपंचेंद्रियनिग्रहंतपः॥अकुत्सि
तेकर्मणियःप्रवर्ततेनिवृत्तरागस्यगृहंतपोवनं॥एतत्तेसर्वमाख्यातंमयानत्वेनभारत॥
शममनःसमाधाय ध्यानयोगपरोभव॥यइदंशृणुयान्नित्यंपुण्यमाख्यानमुत्तमं॥यःप
ठेन्मानरुच्छायसगच्छेत्परमांगतिं॥ ॥इतिश्रीइतिहाससमुच्चयेकुंडधारजांजलिसंवा
दोनामत्रयोदशोध्यायः॥ ॥युधिष्ठिरउवाच॥ ॥कोविदर्थंप्रशंसंति धर्मंचैवतथापरे॥तयोः
कोन्वुत्तमोलाभस्तन्मेब्रूहिपितामह॥भीष्मउवाच॥ ॥मानुष्यंप्रनयोवित्तमर्थमाकुरुशा
श्वतं॥दैवमाक्रम्यवित्तंधर्मंदिव्यसुखप्रदं॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥कुंडधा ४३

रेणयत्प्रीत्याभक्तायोपकृतंपुरा॥अधनोब्राह्मणःकश्चिद्धनार्थीलोभमोहितः॥देवताःपूजया
मासनचावापधनंक्वचित्॥ततश्चिंतापरोभूत्वाकतमासादेवतासेवेत्॥यामेशीघ्रंप्रसीदेतसामा
नुरजडीकृता॥सोथापश्यत्तुंडधारंदेवानुचरमंतिके॥तंदृष्ट्वाचिंतयन्सोपिश्रेयोयंविविधास्य
ति॥संनिकृष्टश्चदेहानांनचान्यैर्मानुषैर्वृतः॥एषमेदास्यतिधनंप्रभूतंशीघ्रमेवतु॥युगकोटि
सहस्राणिविष्णुमाराध्यपद्मभूः॥पुनस्त्रैलोक्यधातृत्वंप्राप्तवानितिशुश्रुम॥योविष्णुं
स्वल्पकालेनप्रसादयितुमुद्यतः॥समुद्रंबाहुनालीनःसोपिपारंनकांक्षति॥तथाहमल्पका
लेनकुंडधारंयथाविधि॥आराधयितुमिच्छामितत्प्रसादायसर्वथा॥ततोगंधैश्चमाल्यैश्च
धूपैरुच्चावचैरपि॥बलिभिःश्चोपहारैश्चपूजयामाससद्विजः॥ ॥भीष्मउवाच॥ ॥अथ
स्वल्पेनकालेनप्रीतस्तस्मैसकुंडधृक्॥परोपकारनिरतोवाचंतस्मैउवाचह॥ ॥कुंडधारः॥

द्रति·
४४

ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते शठे॥ निःकृतिर्विहिता सद्भिः कृतघ्ने नास्ति निःकृतिः॥ कीर्तनं
दर्शनं चैव स्पर्शसंभाषणं तथा॥ कृतघ्नस्य न कार्याणि श्वपाकसदृशो हि सः॥ एवमुक्त्वा तु देवांश्च
समासीनानुपेत्य सः॥ प· पानाशिरसा भूमौ तेषामेवाग्रतः स्थितः॥ ततस्ते देववचनान्मणिभ
द्रो महामतिः॥ उवाच पतितं भूमौ कुंडधार किमिच्छसि॥ ॥कुंडधार उवाच॥ यदि प्रसन्ना देवा मे
भक्तः कश्चिद्द्विजोत्तमः॥ तस्यानुग्रहमिच्छामि कृतं देवैरहं कृतः॥ ततस्त्वां मणिभद्रस्तु पुनर्वच
नमब्रवीत्॥ देवानामेव वचनात्कुंडधारमुवाच तं॥ उत्तिष्ठोत्तिष्ठ भद्रं ते कुंडधार सुखी भव॥ या
वद्धनं प्रार्थयते तावत्तस्मै ददाम्यहं॥ विचार्य कुंडधारस्तु मानुष्यं धनमध्रुवं॥ ततः स प्रार्थया
मास धर्मबुद्धिं सुदुर्लभां॥ ॥कुंडधार उवाच॥ महांतं धनराशिं वा पृथिव्या राज्यमेव वा॥ भ
क्ताय नाहमिच्छामि दृढमस्तु स धार्मिकः॥ विद्या धनं तपः शौर्यं कुलीनत्वमरोगता॥ राज्यं स्व ४४

र्गश्च मोक्षश्च सर्वं धर्मादवाप्यते॥ नार्थलोभान्न च स्नेहान्न क्रोधान्न च मत्सरात्॥ न कामान्न भयाद्वा
पि सर्वं ज्ञानः परित्यजेत्॥ यस्तु धर्मं परित्यज्य लोभादर्थमभीप्सते॥ स द्रव्यराशिमुत्सृज्य पांसुराशिं
जिघृक्षति॥ देवा मुनयो नागा गंधर्वा गुह्यकास्तथा॥ धार्मिकं पूजयंत्येव न धनाढ्यं न कामिनं॥ अ
र्थहीनोऽपि धर्मात्मा स्वर्गं गच्छति नान्यथा॥ अर्थवान्धर्महीनस्तु नरकं प्रतिपद्यते॥ किं धनं नाविपन्ने
नयत्यन्यो विप्र भुज्यते॥ परो धर्मः परलोकस्थं फलमप्यनुगच्छति॥ तस्मादेव स्वसो विप्रो नित्यधर्मप
रायणः॥ धर्मो चास्तु सिद्धिं प्राप्नोतु नायं मेऽनुग्रहो मतः॥ मणिभद्र उवाच॥ ॥यदि धर्मफलं राज्यं सु
खानि विविधानि च॥ न सर्वाणि च सोऽश्नातु कायक्लेशाविवर्जितः॥ ॥भीष्म उवाच॥ ॥असकृ
त्प्रोच्यमानोऽपि कुंडधारो धनं ततः॥ प्रार्थये द्धर्ममेवासौ ततस्तुष्टाश्च देवताः॥ तुष्टाश्च देवताः
सर्वा तस्य चैतद्द्विजन्मनः॥ भविष्यति च धर्मात्मा धर्मे सिद्धिं वयास्यति॥ ततः प्रीतः कुंडधारो लु

शांति ४५ धावसरदुर्लभं॥ चिंतयामास तस्यैव निर्वेदं स महात्मनः॥ चिंतयित्वा तमाकूप धनचिंतापरीक्षितुं॥
चीराण्यादाय सूक्ष्माणि वल्कपार्श्वे द्विजन्मनः॥ दृष्ट्वा सन्तानि चीराणि पार्श्वस्थानि द्विजोत्तमः॥ निर्वे
दं परमापन्नं उवाच दैव चस्तदा॥ अयं नून दृष्टवानिकस्त्वन्यो वत्स्यतेकृतं॥ गच्छामि वनमेवाहं परं धर्मनि
षेवितुं॥ अनाद्यस्य चयो धर्म अर्थार्थो क्लिश्यते नरः॥ भा — ध्याहित्वा छालोभ गत्वा छां प्रधावति॥
अभाविनस्तवत्यर्थो नाशनास्ति च भाविनः॥ एतद्वदंतोपि बुधाः क्लिश्यंते दैवमोहिताः॥ यः
पुराकृतवान् धर्मं मर्थं स इह विंदति॥ येनासौ न कृतः पूर्वं कुलस्तस्यार्थ संपदः॥ प्रख्यात
स्य दैवेन मिथ्या चार्यपारिश्रमः॥ तुल्ये सति परिक्लेशे कः प्रद्वेषस्तपोधने॥ अत्यंतं विमुखे दैवे
व्यर्थे याते च पौरुषे॥ मनस्विनो दारिद्र्यस्य वनादन्यकुतः सुखं॥ साधयिष्ये तथात्मानमुग्रे
णतपसाप्यहशं॥ यथा न भूयः कृपणो यास्यामि क्वचिदर्थिता॥ यत्किंचित्रीपुलोके सुप्रार्थयं ४५

तिनराः सुखं॥ तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमं॥ तपसैव हि देवत्वं देवाः संप्रतिपेदिरे॥ तपसैव च
संसिद्धिं मुनयः परमां गताः॥ ॥भीष्म उवाच॥ ॥एवमुक्त्वा तु चीराणि गृहीत्वा तानि स द्विजः॥
वनं प्रविश्य सुमहत्तपस्तेपे सुदुष्करं॥ पूर्वं मूलफलाहारः पश्चात्पर्णाशनोभवत्॥ त्यक्त्वा तु
तान्यपि ततो वायुभक्षोभवच्चिरं॥ तस्य धर्मपरस्यासीद्वने वन्यफलाशिनः॥ कुंडधार प्रसादेन बु
द्धिस्तत्कार्यदर्शिनी॥ सोचिंतयत्कदाचित्तु यदि — धाद्दयं धनं॥ राज्यं वा मम संतुष्टः कथं जीवामि
दुःखभाक्॥ ततः प्रादुरभूत्तस्मिन्कुंडधारो महामतिः॥ कृत्वा कृतघ्नतांतस्य परमार्थविशार
दः॥ तं साक्षात्कुंडधारस्तु प्रीतात्मा प्रत्यपूजयत्॥ अथास्य दर्शयामास गतिं राज्ञां सुदुस्त
रां॥ पश्य राज्ञां क्षितिं विप्र यां त्वं प्रार्थितवान्पुरा॥ नास्याः कष्टतरं लोके विद्यते कटुकोपमं
ततो राज्ञां सहस्राणि मग्नानि निरयं शुभे॥ दूरादपश्यद्विप्रोसौ तदा दिव्येन चक्षुषा॥ कुंडधा॰

इति० ४६

यदित्वंपरजयित्वामांप्राप्तवान्नातिमीदृशं॥ततस्तत्वमयाविकःकस्येनुर्हो भवेत्॥पश्यत्वंपश्य
भयस्त्वंपदिदंजगदाहृदं॥स्वर्गद्वारविरुद्धंचसमंतादहानात्मनां॥सर्वएवहिलोकोयंयदि
स्याद्धर्मतत्परः॥ततोनिरंतरंस्वर्गोभवेत्श्वन्यानमेदिनी॥ ॥भीष्मउवाच॥ ॥ततोपश्यत्सकामंरक्रोधलो
भंमदंतथा॥निशंमत्सरमाल्स्यंक्लिष्टंत्यादत्यदेहिनः॥एतैर्लोकाःसन्निरुद्धाःदेवानांमानुषोद्भयं॥
देवादेशात्समंतात्तैर्विघ्नंकुर्वतिदेहिनां॥ ॥भीष्मउवाच॥ततःपपालशिरसाकुंडधारायसद्द्विजः
उवाचचैनंसुप्रीतोमहात्मेअनुग्रहंकृतः॥मनसापिनकांक्षंतियत्कामाननुजीविनः॥सपादयंतितां
स्तेषांस्वामिनोभक्तवत्सलाः॥अर्थलोभाभिभूतेनयन्मयापात्वमस्त्ययमा॥परांप्रीतिंचविद्वापत
त्सर्वंक्षंतुमर्हसि॥क्षांतमेवमयेत्युक्त्वाकुंडधाराद्विजोत्तमं॥संपरिष्वज्यबाहुभ्यांतत्रैवांतरधीयत॥ततस्य
प्रसादेनदेवानांचविशेषतः॥निर्वेदंपरमापन्नःसमलोष्ठाश्मकांचनः॥ब्राह्मणोपिपरांसिद्धिंधर्मेण ४६

प्राप्यभारत॥देववत्स्वर्गलोकेषुविचचारयथासुखं॥रागद्वेषादिरहितःसदाध्यानपरायणः॥अचि
रेणैवकालेनप्राप्तवान्वैष्णवंपदं॥एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि॥तस्माद्धिद्धिमहाराज
विनाद्धर्ममनुत्तमं॥धर्मात्स्वर्गश्चमोक्षश्चप्राप्यतेवैष्णवंपदं॥इतिहासमिमंपुण्यंश्रोतरुत्थायमान
वः॥श्रावयेधर्मभागीस्याद्धर्मतत्वंसगच्छति॥इतिश्रीइतिहाससमुच्चयेकुंडधारोपाख्यानंना
मचतुर्दशोध्यायः॥ ॥ ॥युधिष्ठिरउवाच॥दह्यमानसमारंभंयादीनासाधयेद्धनं॥नरस्त
त्राभिभूतश्चाकिंकुर्वन्सुखमाप्नुयात्॥ ॥भीष्मउवाच॥ ॥सर्वसाम्यमनायासःसत्यवाक्यं
चभारत॥निर्वेदश्चाविवित्साचयस्यस्यात्ससुखीनरः॥एतान्येवपदान्याहुःपंचवृद्धाःप्रशांत
ये॥एतत्स्वर्गश्चमोक्षश्चसुखंचानुत्तमंस्मृतं॥यस्यैतानिपदान्याहुःस्तस्यैवससराचरं॥निर्वेद
मंकिनागीतंस्तत्रिबोधयुधिष्ठिर॥दह्यमानोधनंमंकीभग्नेहश्चपुनःपुनः॥केनविद्धनशेषेण

शांति·
४७

क्रीतवान्दम्यकौयुगं॥ततस्तौदमनानौतुवनेदाम्येसुखंयुतौ॥आसीनमुष्ट्रमध्येनसहसैवाभ्यधा
वतां॥अथोष्ट्रस्तूर्णमुच्छ्रायदम्यौमुत्क्षिप्यतौलदा॥काकतालीयवशादैवात्सप्रसादमहार्णवः॥तौन
दाम्रियमाणौतुतेनोष्ट्रेणबलीयसा॥निरीक्ष्यम्रियमाणौतौमंकीतत्राब्रवीदिदं॥प्राज्ञेनाथसम
र्थेनानित्योद्योगपरेणच॥प्रासंनाविहितंकर्तुंदक्षेणापिधनेक्वचित्॥पौरुषेनित्ययुक्तस्ययुक्तंचैवा
नुष्ठतः॥पश्येनंसमनुप्राप्तंममदेवाद्वल्लभं॥अन्यथाचिंतिताह्यर्थानरेरर्थपरायणेः॥अन्य
थेवाहिगच्छंतिदैवयोगगतिर्मम॥दुःकरंचनकुर्वंतिसुकरंस्तेत्यजंतिते॥वयमेतान्परित्यक्तुंमस
तोपिनशक्नुमः॥छिन्नाछिन्नाःसमारंभाभवंतिविफलाममः॥नूनंहि क्लेशाश्रयिष्यास्थिरेणाम
मेदृशी॥बलवानपिनाप्नोतिधनंभाग्यविवर्जितः॥दृश्यतेचसभाग्येषुबालस्त्रीवृद्धरोगिणां॥अ
हानाक्लिश्यतेलोकः पुण्यैश्वर्यमवाप्यते॥नमंत्रबलवीर्येणप्रज्ञयापौरुषेणच॥अभाग्यैल ४७

ध्रतेमर्त्यस्तत्रकापरिदेवना॥अर्थार्थीयानिकर्माणिकरोतिकृपणोजनः॥तान्येवयदिधर्मार्थेकुर्यात्त
कोदुःखभाग्भवेत्॥अर्थानामार्जनेदुःखंअर्जितानांचरक्षणे॥आयेदुःखंव्ययेदुःखंधिगर्थान्
कष्टसंश्रयात्॥यश्चार्थपतिरुद्विग्नोयश्चसर्वार्थनिस्पृहः॥तयोरर्थपतीदुःखीसुखीसर्वार्थ
निस्पृहः॥तस्मात्यक्त्वार्थसंकल्पान्यथालब्धेनवर्तयेत्॥नार्थलोभादिहात्मानंक्लेशयिष्या
म्यहंपुनः॥ततोमनःसमाधायचरिष्येव्रतमुत्तमं॥यथानभूयःकामान्मेदुःखंप्राप्स्यामिक्लेशभा
जनं॥अहोसम्यक्शुकेनोक्तंमुक्तसंगेनसर्वतः॥प्रविष्टःकृत्स्नदारण्यंजनकस्यनिकेतनं॥यः
कामान्कामयेत्सर्वान्यश्चैतान्केवलांस्त्यजेत्॥प्रपण्यात्सर्वकामानांपरित्यागोविधीयते॥
यघस्त्यजतिकामानांतत्सुकस्यादिदर्शने॥कामानुसारीपुरुषः कामादेवविनश्यति॥नातःसु
खतरंकिंचित्त्रिषुलोकेषुविद्यते॥वीतदृष्टस्यकामेभ्योमुक्तसंगस्ययत्सुखं॥तत्तस्यैवमतंह्या

शांति· ५८
त्वामहर्षैर्भावितात्मनः॥प्रभवंसर्वदोषाणांकामंत्यक्ष्याम्यशेषतः॥कामंबंधनमेवैतन्नान्यल्लोकेऽस्ति
बंधनं॥कामबंधनमुक्तोहिनेहत्रयोपिजायते॥संकल्पंनकरिष्यामिसत्त्वयेनभविष्यति॥नैन
त्वंवेत्सिसुलभंनैवत्वंवेत्सिदुर्लभं॥पानात्त्वद्दुःखरोमांहिक्लेशपलेसदा॥जेतोयिजितंसर्वंभावि
ष्यतिविदुर्बुधाः॥तस्मात्त्वामद्यजेष्यामिदुर्जयंशत्रुमात्मनः॥नैराश्यंपरमंसौख्यमितिज्ञात्वानिरि
रान्मया॥दत्स्यनाशेनिराशोद्यशयिष्यामिगतज्वरः॥क्षमिष्येक्षममाणानांनाहिंसिष्यामि
हिंसितं॥द्वेष्यमुक्तःप्रियंवक्ष्येअनादृत्यतदप्रियं॥संतोषमार्जवंशांतिंतनःसत्यधृतिक्षमां॥
सर्वभूतदयांचाहमद्यैवशरणंगतः॥यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं॥तृष्णाक्षयसुख
स्यैतेनार्हतःषोडशींकलां॥दृश्यलोकत्रयस्यास्यनिर्वेदपारिपंथिनी॥येत्त्वंनिर्मोल्यवस्तुत्वाते
त्यंतसुखिनोनराः॥त्यक्त्वाकामंभयंक्रोधंद्रोहंलोभंमदंतथा॥एषब्रह्मप्रविष्टोहंग्रीष्मेशीत ५८

मिवह्रदं॥तांत्यक्त्वासुखमाप्नोतितांत्यक्त्वाविंदतेपरं॥तांत्यक्त्वानिर्भयःशेतेसर्वंत्यक्त्वासुखीभवेत्॥
तावन्मनोनिरुध्यंतिहृदियावक्षयंगतं॥एतज्ज्ञानंचध्यानंचशेषाग्रंथविस्तराः॥सर्वकामान्परि
त्यज्यसन्निवेश्यमनोहृदि॥प्राप्स्यामिपरमंब्रह्मयत्कांक्षंतिमुमुक्षवः॥आत्मनासहजंकामंजित्वा
शत्रुमनुत्तमं॥प्राप्स्यतत्परमंब्रह्मअद्यैवाहंसुखास्थितः॥ ॥भीष्मउवाच॥ ॥इत्येवंद्रव्यनाशेन
मंकीनिर्वेदमास्थितः॥सर्वकामान्परित्यज्यब्रह्मप्राप्तःपरंतथा॥विमुच्यतियदासर्वान्कामानां
सुहृदंतथा॥तदात्मनमवाप्नोतिपुरुषानात्रसंशयः॥आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रवि
शंतियद्वत्॥तद्वच्चकामःप्रविशंतिसर्वेसंसिद्धिमाप्नोतिनकामकामी॥अतीवदुःखार्जितद्रव्य
नाशंविचिंत्यमंकीविगतार्थमंतः॥तथैवचामुष्मिकसंपदावहंचकारधर्मंविषयेषुनिस्पृहः॥
ततःस्वधर्मार्जितबोधसाधनंपुराकृतेनापिविशुद्धकर्मणा॥जगामविष्णोःपदमेवतद्वरंकिमत्तुदुः

आपमरोमहात्मनां॥मंक्यारव्यानंसुपण्यंवैयेपठंतिद्विजोत्तमाः॥श्रावयंतिचयेविप्रास्तेयांतिपरमां
गतिं॥ ॥इतिश्रीइतिहाससमुच्चयेमंकीगीतंनामपंचदशोध्यायः॥ ॥युधिष्ठिरउवाच॥ ॥तपसाश्र
द्धयावापिदानेनापिपरंतप॥सेव्यनेगुरुसंदेशान्स्वयंधर्मसमुद्भवान्॥श्रतानांकतरःश्रेष्ठंतन्मेब्रूहि
पितामह॥जन्मांतरस्यहस्त्रेपुयाबुद्धिःसत्वसंयुता॥तयास्वधर्मैतिष्ठंतिब्रह्मसपद्यतेतदा॥नहु
षोनामराजर्षिःसर्वेषांमग्रजः॥बोध्यंदांतंवशास्त्रज्ञंपष्टवानितिश्रुश्रमः॥किमवोचन्म
हाराजःकिमवोचन्महामतिः॥कथंनिर्वेदमापन्नात्तन्मेविस्तरतोवद॥ ॥भीष्मः॥अत्रैवो
दाहरंतीममितिहासंपुरातनं॥बोध्यदांतमृषिंराजासपृच्छन्नहुषोयथा॥ ॥नहुषउवाच॥ ॥
काबुद्धिस्त्वंसमास्थायलोकेचरासिमुक्तवान्॥निस्पृहःसर्वकामेभ्यःतन्मेब्रूहिपितामह॥
बोध्यउवाच॥ ॥पिंगलाकुररःसर्पसागरश्चैवषट्पदः॥इषुकारःकुमारीचषडेतेगुरवोमम॥

संकेतेपिंगलावेश्याकांतेनाशानिराकृता॥सातुकृच्छ्रगताशांताबुद्धिमास्थायसात्विकीं॥आशाहिपर
मंदुःखंनैराश्यंपरमंसुखं॥आशानिराशीकृत्यावसुखंस्वपातिपिंगला॥सामिषंकुररंदृष्ट्वावध्यमा
नंनिरामिषैः॥आमिषस्यपरित्यागात्कुररःसुखमेधते॥बहूर्थिभिर्बहुभ्यश्चशास्त्रेभ्योमतिमा
न्नरः॥सर्वतःसारमादायपुष्पेभ्यइवषट्पदः॥इषुकारोमनःकश्चिदिष्वेवगतमानसः॥समीपेना
तिगच्छंतंराजानंनावबुद्धिवान्॥बहूनांकलहोनित्यंद्वाभ्यांसंकथनंभवेत्॥एकाकीविचरेतस्मा
त्कुमारीकंकणंयथा॥इत्येवंचेष्टितंतेषांमतिष्ठत्ससमाहितः॥सर्वकामान्परित्यज्यविचराम्यहमु
क्तवत्॥ ॥भीष्मउवाच॥इत्येवंकथयित्वातुपार्थिवेंद्रायसाद्विजः॥जगामस्वगृहंप्रीतोराजापिस्व
गृहंततः॥अवेहिराजन्पुरुषार्थसाधनंभवेतिलोकागुरुदर्शनंगताः॥तयासबोध्योविचरन्यथा
सुखंसमेपिवान्ब्रह्मपदंसनातनं॥ ॥इतिश्रीइतिहाससमुच्चयेबोध्यनहुषसंवादोनामषोडशोध्यायः॥

शांति॰ ५० ॥ ॥वैशंपायन उवाच॥ ॥शरतल्पगतं भीष्मं वृद्धं कुरुपितामहं॥ मूर्ध्नाप्रणम्य धर्मात्मा पप्रच्छेदं युधिष्ठि
र॥ ॥युधिष्ठिरः॥ सर्वेषामेव धर्माणां लाभानां को लाभः परमस्मृतः॥ एतन्मे संशयं तात छेत्तुमर्ह
स्यशेषतः॥ ॥भीष्मः॥ ॥प्रज्ञालाभात्परो लाभो न कश्चिदिह दृश्यते॥ प्रज्ञावान्सुखमाप्नोति पुमानि
हपरत्र च॥ प्रज्ञानिवृत्तिं प्राप्नोति हि बलिरैश्वर्यसंक्षयात्॥ प्रह्लादो नमुचिर्मंकी तस्यां किं विद्यते परं
॥अत्रैवोदाहरंतीममितिहासं पुरातनं॥ इंद्रकश्यपसंवादं तन्निबोध युधिष्ठिर॥ वैश्यः कश्चिद्यथा
यातं कश्यपं नामतो द्विजं॥ रथेन पातयामास धनैश्वर्यमदान्वितः॥ स निश्वसन्सुदुःखार्तो
निर्वेदादिदमब्रवीत्॥ मरिष्यामीह दुःखार्तो कोन्वर्थो जीवितेन मे॥ तं मृत्युकृतसंकल्पं कश्यपं
दीनमानसं॥ इंद्रः सृगालरूपेण समेत्य प्रत्यबोधयत्॥ ॥सृगाल उवाच॥ ॥यदास्त्वमपि ते चेतो
ना उत्क्रांतिं तं प्रति॥ परेण प्रातिकूल्ये न किमर्थं परितप्यसे॥ आत्मनः प्रतिकूलानि परेभ्यो दापयेन ५०

यसि॥ परेषां प्रतिकूलेभ्यो निवर्तयत ते मनः॥ यत्कृतं हि पुरा येन ध्रुवं स तदिहाश्नुते॥ तद्दुःखं स्वकृतं वाप्य
पीड्यसे न परेण किं॥ पीड्यमानोपि दुःखाद्यैर्वृथा किमनुतप्यते॥ सर्वदुःखापहं धर्मं स्पृष्ट्वा किं त्वं करोषि
तं॥ धर्मं कर्तुमशक्ता ये ते शोचंती हमद्विधाः॥ त्वं तु धर्मक्रियाशक्तो विप्रः सन् किं नु मुह्यसि॥ मानुष्यं प्रा
प्य ते ब्रह्मन्पुण्यैर्बहुविधैरपि॥ मानुषत्वे च विप्रत्वं तस्मात्कृ॥ त्रियतां तथा॥ संभवानुत्तमं लब्ध्वा श्रोत्रियत्वं
सुदुर्लभं॥ कथं तु निधनोस्मीति निर्वेदान्कर्तुमर्हसि॥ अघो घोरदर्शनेकस्य महिमा नोपचीयते॥ उपद्रु
परिपश्यंतः सर्व एव दद्यति॥ प्रार्थयंति धनं विप्रा पुरुषा विषयात्मकाः॥ धनं च विषयांश्चैव त्यजंति कृत
बुद्धयः॥ सद्भिर्विगर्हितानीव दुःखधात्री धनस्पृहः॥ संतुष्टाय स्वकर्मस्थो सोत्यंतं दिमोदते॥ धनानि
पुरुषो विप्रपुरुषं धनमेव च॥ अवश्यमेकं त्यजति तस्माल्लिं धनतृष्णया॥ स्पृहवत्यस्य संतुष्टा धनीनां
वनमस्पृहा॥ संतोषः क्षीणशोकस्य किं धनैर्धनदेन च॥ धनेन ह्यात्मवक्त संगानां परतुखं शांतचेतसां॥ कुत

इति ५२

स्तइनलुब्धानांइतश्चेतश्चधावतां॥ यद्यपिवारिधिनेमिस्समांभूमिमिमांलभतेसराजा॥ नशतेनधनेन
धनैषीत्स्यातिकिंसुखंसुखलाभे॥ ममामित्रममसोममपुत्रोममजननीयामितिप्रवदंतः॥ सहसायमसा
धनमुग्रंसर्वमिदंविरहय्यभजंते॥ भवत्यर्थविनाधर्मोनार्थोधर्मविनाभवेत्॥ तस्मादुर्मपराधीनो
स्पृहामर्थेपरित्यज॥ अर्थोत्पत्तौमहदुःखंअर्थप्राप्तौननोधिकं॥ संजातेष्वपिचार्थेषुविप्रयोगेततो
धिकं॥ अर्थोपार्जनशक्तोहिनश्रेयोविंदतेनरः॥ तस्मादर्थागमःसर्वमनोमोहविवर्द्धनः॥ राजतः
सलिलादग्नेश्चोनरस्स्वजनादपि॥ भयमर्थवतांनित्यंमृत्योःप्राणभृतामिव॥ जयथामिषंजलेमत्स्यै
र्भक्ष्यतेश्वापदैर्भुवि॥ आकाशेपक्षिभिःसर्वैस्तथासर्वत्रवित्तवान्॥ दरिद्रःप्रार्थयत्यर्थंअर्थवान्
राज्यमिच्छतिराजानःपृथिवीशत्वंपृथ्वीशाश्चचक्रवर्तिता॥ इंद्रत्वंचक्रवर्तीचतथास्याद्ब्रह्मणःपदं॥
तस्मादपिपुनस्तस्मात्तस्मादपिपुनःपुनः॥ एवंनातंहितृष्णायागताःसर्वेपिकश्चन॥ तस्मादुपात्तां ५२

दुःपारांधनतृष्णामिमांत्यज॥ सुमहद्भिरपिप्राप्तैस्तृष्णानार्थैःप्रशाम्यति॥ संभृत्यचलतिसाभूयःसर्पिर्भिरि
वपावकः॥ स्वप्नलब्धायथालाभःविफलःप्रतिबोधने॥ तद्विधाहिद्विजश्रेष्ठनराणामिहसंपदः॥ सं
पदोनिळधौतांबुतरंगक्षणभंगुरः॥ कस्तावाश्वासीविषानासक्तरुच्छायास्थिवावसेत्॥ कार्पण्यंमत्सरो
दंभःक्रोधश्चैवभयमदः॥ अर्थजानिविदुःप्राज्ञादुःखान्येतानिदेहिनां॥ तदेवंबहुदुःखस्यनिंदितस्य
मनीषिभिः॥ अर्थस्यार्थेकथंनामप्राणांस्त्यक्तुमिहेच्छसि॥ आत्मप्राणपरित्यागंगर्हयंतिविपश्चितः
॥ अप्यंतजस्यपापस्यकुमुतब्रह्मवादिनः॥ अज्ञानानिद्रयासुप्तःसुखदुःखप्रबोधय॥ चिरंसुप्तो
सिउत्तिष्ठप्रतिबुद्धस्वसांप्रतं॥ ब्राह्मण्यंप्राप्यतेब्रह्मन्नतपोभिर्बहुभिर्भुवि॥ तल्लब्ध्वायदिसंचारे
खल्वात्मानिवंचितः॥ अहोकृतार्थतातेषांयेषांसंतीहपाणयः॥ पाणिमद्भ्यःस्पृहास्माकंधनार्थि
भवतोयथा॥ अपाणित्वाद्वयंब्रह्मन्कंटकान्नोद्धरामहे॥ जंतूंश्चरुंधतोदेहंतान्निपेक्तुंनशक्नु

द्वाति० ५२

मः॥तथापिनात्मनःप्राणान्स्यक्तुमिच्छाम्यहंद्विज॥अस्मात्पापतरांयोनिंपातिष्यामःपरामिति॥दृष्ट
व्यांहिसृगालत्वंकमलन्नचमर्षिकान्॥ससर्पात्रचमंडूकानचायान्याययोनिषु॥हस्ताधवधिरा
न्पंगून्रोगीमूकजडास्तथा॥अव्यंगमरोगीत्वमहोधन्योस्मिकश्चन॥तदनेनैवलाभेनसुहृदंतो
ष्टुमर्हसि॥किंपुनर्यासिसत्वानांसर्वेषामुत्तमोद्विज॥श्रृणोसियादिमेत्रसुभाषितंश्रद्धासिच॥
तनोयत्रस्त्वधर्मायंनात्मानंत्यक्तुमर्हसि॥धर्मंमाचरतोवान्तैर्यदिनोपगमिष्यति॥नयामिकिं
चिल्लोकेत्वंसाकान्यापिनपश्यते॥जीवितःशीकवस्यापिधर्मायस्य[illegible]नसीदति॥अघएवसमं
तव्योधर्मेविज्ञाहिंसाधवः॥स्वाध्यायमग्निसंस्कारंब्रह्मचर्यंदमस्तपः॥आस्तेयमनसूयां
चक्षमांचैवानुपालय॥असत्यवर्जनंहिंसासमंतोषसमार्जवं॥नाशव्यंमानमीर्ष्यांचविषयां
श्चपरित्यज॥विषयाविषयासक्ताधनंबहुमतंनृणां॥निवृत्तविषयेच्छानांकिंधनेनमनीषिणां ५२

अपित्यक्तुंनशक्नोषिविषयान्विषयात्मकः॥त्यजतेषुनतःसंगंजीर्णांत्वचमिवोरगः॥नहिखल्वच
प्यसंगस्यकामःकचनजायते॥दर्शनात्स्पर्शनात्तघ्राणाच्छ्रवणाच्चसजायते॥नत्वंस्मरासिवा
रुण्याःसर्वांगस्यचपाक्षिणः॥ताभ्यांचाप्याधिकाभक्ष्यानकाश्चिदिहविद्यते॥यानिचान्यानिह
रेषुभक्ष्यभोज्यानिकानिचित्॥तेमभुक्तपूर्वेत्वांनित्यमस्त्तप्तिरेवते॥अदर्शनमनाघ्राणम
ध्यानश्रवणंतथा॥सुरूपोहियमैरेतैःश्रेयप्राप्नोत्यनुत्तमं॥शब्दरूपरसस्पर्शगंधादि
भ्योयथातथा॥विरागमेतिपुरुषःशांतिमेतियथातथा॥यतोयतोनिवर्तेतततस्ततोवि
मुच्यते॥निवर्तनाद्धिसर्वत्रनवेत्तिदुःखमण्वपि॥तस्मात्वंविषयास्त्यक्त्वाविषदुग्धांसुद्र
स्यजां॥हृदिकृत्वेयग्राममंशशकुंतइवपंजरे॥विषयैर्नीयतेदेहीधाराभिरिवतप्यते॥लो
केवितनमात्मानंलोकंयात्मनिपश्यति॥इंद्रियाणिसमस्तानिनियम्यमनसाहृदि॥मनोबुद्धिः

समाधाय बुद्धिं वा परमात्मनि ॥ एवं बुद्धिं समाधाय परे ब्रह्मणि निश्चलां ॥ क्षिप्रं यास्यसि निर्वाणं निरिंधन इ
वानलः ॥ अथाद्वैतं नशं कोपि परमात्मानमच्युतं ॥ हृद्याकार समाधत्स्व यथारुचितमात्मनः ॥ नारायणं
जगद्योनिं सर्वलोकमहेश्वरं ॥ ये चिंतयंति मनसा न तेषां विद्यते भयं ॥ ॥भीष्म उवाच॥ ॥श्रुत्वैतत्तु
इंद्रः सर्वं स्टगालेनाहाविस्मितः ॥ विष्णुर्महेंद्रो रुद्रो वा ब्रह्मा हि किं त्वं महामते ॥ इंद्रोहमस्मि संप्राप्तस्तवा
नुग्रहकाम्यया ॥ सत्कालोकं समनुनिष्ठ वरधर्ममनुत्तमं ॥ ॥भीष्मः॥ एवं तत्त्वमथ्यास्य इंद्रोपि
त्रिदिवं गतः ॥ कश्यपोपि यथोक्तं तु कृत्वा मुक्तिमवाप्नुयात् ॥ तस्मात्तु सर्वलाभानां प्रज्ञालाभः पर
स्मृतः ॥ प्रज्ञावान् सुखमाप्नोति शुभानिह परत्र च ॥ प्रज्ञापकमिदं सर्वं दृश्यादृष्टविचेष्टितं ॥ तस्माद्
भयासिद्ध्यर्थं कुर्यात्प्रज्ञाविशिष्यते ॥ सनातनं गुणरहितं निरंजनं जनार्दनं त्रिभुवनकर्मसाक्षि
कं ॥ नमामि तं नरवलोकनायकं पुनर्भवं व्यसनभयापहं सदा ॥ पराभवव्याधितमहार्थनिश्चयं ५२

प्रबोधितं व्यथितं द्विजोत्तमं ॥ स्टगालतामुपगतपुरंदरो महात्मना भवति महाननुग्रहः ॥ इदं कश्यपसं
वादं येश्रृण्वंति दिने दिने ॥ इंद्रस्थानसंप्राप्य मोदते त्रिदशैः सह ॥ ॥इति श्री इतिहाससमुच्चये इंद्र
कश्यपसंवादो नाम सप्तदशोध्यायः ॥ ॥युधिष्ठिर उवाच॥ अतिक्रमति कालोस्मिन्सर्वभूतक्ष
यावहे ॥ किं कर्तव्यं परं श्रेयस्तन्मे ब्रूहि पितामह ॥ ॥भीष्मः॥ सर्वसत्वदयालुस्त्वं सर्वेंद्रियावि
निग्रहः ॥ सर्वत्रानित्यबुद्धिश्च श्रेयः परमिदं शुभं ॥ अत्रैवोदाहरंतीमामितिहासं पुरातनं ॥ पितुः
पुत्रेण संवादं तन्निबोध युधिष्ठिर ॥ द्विजातेः कस्यचित्तु त्रोमेधावी नाम नोभवत् ॥ अब्रवीत्पित
रं पुत्रः स्वाध्यायपजनेरतं ॥ ॥पुत्र उवाच॥ धीरः कश्चित्तात कुर्याच्छुभार्थी क्षिप्रं ह्यायुः क्षीजते
मानवानां ॥ पितस्तदाचक्ष्म मत्वमाशु पथा परं धर्ममिमं चरेयं ॥ ॥पितोवाच॥ ॥अधीत्य वेदान्
ब्रह्मचर्येण पुत्र पुत्रानिछेन्पावनार्थं पितृणां ॥ अग्नीनाधाय विधिवच्चेष्टयज्ञो वनं प्रविश्याथ

इति॰ ५४

मुनिर्वभाषे॥ ॥पुत्रः॥ मृत्युनाभ्याहते लोके जरया परिपीडिते॥ व्याधिभिर्ग्रस्यमाने च किं स्वस्थ इव भा
षसे॥ सर्वोपायैर्यदा नास्ति मर्तव्यस्य प्रतिक्रिया॥ सोहं कथं प्रतिक्षिप्ये अद्यैनैवाद्य न चिरं॥ राज्यां रा
त्र्यां व्यतीतायां मायुरल्पतरं यदा॥ अल्पोदके मत्स्य इव धृतिं विंदेत कः पुमान्॥ कुतो नु खलु दीर्घत्वं आ
युष्यस्तत्र देहिनां॥ आदित्यरथवेगेन क्षीयते हि प्रतिक्षणं॥ प्रतिक्षणमयं कालः क्षीयते हि प्रतिक्षणं
आमकुंभ इवांभस्थो विशीर्णः सन्विभाव्यते॥ अश्वत्थचलपत्राग्रनालकतोय इवास्थिरे॥ स्थिरा
शा जीविते यस्य तत्तुल्यो नास्त्यचेतनः॥ जालमेवांतकोऽवेत्ति जरा चान्वेति देहिनं॥ अनुषक्ता द
येनैते भावास्स्थावरजंगमाः॥ को हि विश्वासमर्थेषु शरीरेषु शरीरस्थ तु॥ कर्तुमुत्सहते लोके ह
स्यासं प्रस्थितं जगत्॥ इत्येवमपि भावित्वाद्विनाशाद्विषु नास्थितं॥ अयमेवाहिनः कालः पर्वमा
सादनंगतः॥ आसन्नतरतामेति मृत्युर्जंतोर्दिने दिने॥ उद्यानं नीयमानस्य वध्यस्येव यथा ५४

यथा॥ उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं॥ मरणव्याधिदुःखानां किमद्य निपतिष्यति॥ न तं प
श्यामि लोकेस्मिन्यो न जातो न मरिष्यति॥ इति संप्रसरयं बुधास्वस्थे स्वस्थाः कथमासते॥ न व्याधयो न वय
मः॥ श्रेयः प्राप्तिं समीक्षते॥ यावदेव भवेत्कालस्तावच्छ्रेयः समाचरेत्॥ बाल एव चरेद्धर्मः मनित्यं जी
वितं यतः॥ फलानामिव पक्वानां शश्वत्पतनतो भयं॥ युवत्वापेक्षया बालो वृद्धत्वापेक्षया युवा॥ मृ
त्योरुत्संगमारूढः संरुरुत्सुः किं करिष्यति॥ पापं परिहरन्मंदमात्मानं परिपालयेत्॥ वर्षासु जीर्णवे
श्मेव तिष्ठन्नेवावसीदति॥ व्रजंति नानिवर्तंते स्रोतांसि सरितामिव॥ आयुरादाय मर्त्यानां रात्र्यहानि
पुनः पुनः॥ अहोरात्राणि मासर्तुवत्सरान्काष्ठाः कलाः कलावान्॥ संपीड्यति कालोयं इंद्रियं वा धुरि
कोयथा॥ यथागारं दृढस्थूणं जीर्णं भिन्नं च सीदति॥ तथा च सीदति नरः कालस्य वशमागतः॥
कालस्य वशमायांति विवशाः सर्वदेहिनः॥ न मृत्युमुपगच्छंति विषयासक्तचेतसः॥ रात्र्यां य

इति· ५५ स्यामतीतापानांनकिंविहुप्रभाचरेत्॥ तदेववंध्यदिवसइतिविद्याद्विजक्षण॥ भार्यामेसंपदोमे
मृत्युरोगजराशोकैर्ग्रस्यमाणःप्रतिक्षणं॥ अजराम
रवृत्तांतकथांतिष्ठंतिनिर्भयाः॥ अद्यैवासीन्मयादृष्टोहाकथंसकथंमृतः॥ मृत्युनाक्रीयमाणा
नांप्रलापःश्रूयतेनृणां॥ कोजानीतेकदाकस्यमृत्युकालोभविष्यति॥ युवैवधर्मशीलस्याद्यने॥ नि
त्यंहिजीवितं॥ जीवितंमरणांतंहिजरांतंरूपयौवनं॥ संपदोविपदंताहिअत्रकोरतिमाप्नुयात्॥ प
श्यवामृत्युनासर्वंयोवास्यादजरामरः॥ तेनैवंसह्यतेवक्तुंइदंश्वोमेभविष्यति॥ इदंश्वोमेद
द्येतिनैतन्मर्त्यस्ययुज्यते॥ अवश्यंभाविनातस्यतस्मिन्नभाविताभवान्॥ नकश्चिदपिजानीते
किंकस्यश्वोभविष्यति॥ तस्मात्त्वस्मरणीयानिकुर्यादद्यैवबुद्धिमान्॥ स्वकार्यमद्यकर्तीनपूर्वा
ह्णेचापराह्णिकं॥ नहिप्रतीक्षतेमृत्युःकृतंवास्यनचाकृतं॥ इदंकृतमिदंकार्यमिदमन्यत्कृताकृतं॥ ५५

एवमीहासमायुक्तंकृतांतःकुरुतेवशं॥ मोहेनमहताविष्टोपुत्रदारार्थसुद्यतः॥ कृत्वाकार्यमकार्यंवापुष्टि
मेषांप्रयच्छति॥ तंपुत्रपशुमित्रार्थव्यासक्तमनसंनरं॥ व्याघ्रःपशुमिवाक्रम्यमृत्युरादायगच्छति॥
मस्तकस्थायिनंमृत्युंयदिपश्येदयंजनः॥ आहारोपिनरोचेतकिमुताकृत्यकारिता॥ स्नेहपाशैर्बहु
विधैरासक्तमनसोजनाः॥ अकृतार्थाविसीदंतिसैकताःसेतवोयथा॥ अपर्यंतस्यकालस्यकियद्वा
शरदःशतं॥ तन्मात्रपरमायुर्वाकथंस्वस्थःस्वपिति॥ दशवर्षाषोडशिकाविंशतिस्त्रिंशतिस्त
था॥ सर्वेवर्षशतारूढंनचतिष्ठंतिसाधवः॥ संपदःस्वप्नसंकाशायौवनंकुसुमोपमं॥ तडिच्चं
चलमायुश्चकस्यस्याज्जीवितेधृतिः॥ किमनेनकरिष्यामिजरामरणभीरुणा॥ अध्रुवेणशरी
रेणमृत्युकंदानुवर्तिना॥ तृणाग्निवनदीवेगस्वप्नसंकाशवर्तिषु॥ आयुर्यौवनभोगेषुप्राज्ञःको
नामविश्वसेत्॥ विश्वासमिहकःकुर्याद्भोगायुर्यौवनादिषु॥ हस्त्यानाथमिवाक्रंदन्हृदयंमे

दृ॰ ५६

मुनाजगत्॥ इदंहिमरणावर्त्तेसंसारोघेनिराश्रये॥ जगन्नस्थानमाप्नोतिभ्राम्यमाणंस्वकर्मभिः॥
इदमेवकरिष्यामितत्तएवंभविष्यति॥ संकल्पःक्रियतेयोयंतन्नमृत्युःप्रतीक्षते॥ अहमेकोनमेकश्चि
नाहमन्यस्यकस्यचित्॥ नतंपश्यामियस्याहंतन्नपश्यामियोमम॥ एकःप्रसूयतेजंतुरेकएवप्र
लीयते॥ एकोहिभुंक्तेसुकृतंएकएवचदुष्कृतं॥ मृतंशरीरमुत्सृज्यकाष्ठलोष्ठसमंक्षितौ॥ विमुखा
बांधवायांतिधर्मस्तमनुगच्छति॥ बलिनोमृत्युसिंहस्यसंसारवनचारिणः॥ भ्रमंत्याधि
जरावादंकथंतिष्ठंतिनिर्भयाः॥ सदासपुत्रभृत्यस्यसपशुद्रविणस्यच॥ क्रियंतोदिवसास्ता
तपास्यंतिकुशलेनते॥ यावन्नदृश्यतेरोगोयावन्नयातितेजरा॥ यावन्नक्षीयतेवायुस्तावच्छ्रेयः
समाचर॥ पुत्रदारकुटुंबेषुसक्ताःसीदंतिजंतवः॥ सरःपंकार्णवेमग्नाजीर्णावनगजाइव॥ लो
हदारुमयैःपाशैर्दृढैर्बद्धोविमुच्यते॥ पुत्रदारमयैःपाशैःपुमान्बद्धोनमुच्यते॥ नचतेपुत्रदारे ५६

षुकर्तव्यामतिरीदृशी॥ कथंतुकृपणोह्येतेवर्तिष्यंतिमयाविना॥ संगत्याजठरेन्यस्तंरेतेबिंदुमचेत
नं॥ केनयत्नेनजीवंतंगर्भस्थमिवपश्यति॥ अन्नपानादिजीर्यंतियत्र[illegible]सुभाषिताः॥ तस्मिन्ने
वोदरेगर्भःकिन्नाम्नैवजीर्यति॥ यंगर्भेपालयत्नेनयत्नसंवर्धयत्यपि॥ तदेवास्वकृतंकर्मसुखदुः
खोपपादने॥ स्वयंमसिंडभर्तस्यपरतंत्रस्यसर्वशः॥ स्वरक्षणेपिमुक्तस्यकोहेतुस्तस्यरक्षणे
॥ स्वकृतैर्जीयतेजंतुःस्वकृतैरेववर्द्धते॥ सुखदुःखेतथामृत्युःस्वकृतैरेवविंदति॥ कोहंकुत्रगमि
ष्यामिकश्चाहंकिमिहागतः॥ कोबंधुर्ममकस्याहमित्यात्मानंविचिंतयन्॥ नबंधुरस्तिनेकश्चिन्न
चबंधुश्चकस्यचित्॥ पथिसंगममेवेदंदारबंधुःसुहृज्जनः॥ पुरासीत्स्वजनस्तेन्यःसांप्रतंव
र्ततेपरः॥ देहांतेवर्ततेचान्यस्तस्मान्नपरतोपरः॥ एवंव्यवसितेलोकेकःकस्यस्वजनोजनः॥
कोवापरजनःकस्यमोहएवहिकेवलं॥ पुत्रदारमयैःपाशैर्मोहजैःकर्मतंतुभिः॥ कोशकारइवा

इति·
५७

त्मानंवेष्टितंनावबुध्यते॥दह्यमानोपिकोशेस्मिन्महताकालवह्निना॥कोलभेनयतिःप्राप्तःप्रदीप्त
इववेश्मनि॥किंतेधनैर्बांधवैर्वाकिंमित्रैःपुत्रदारकैः॥आत्मानमन्विच्छगुहांप्रविष्टंपितामहस्ते
क्वगताःपितातु॥सर्वावासंसर्वसंगंज्ञानगम्यंयोगिध्येयंवासुदेवंसमग्रं॥निस्वारंभंसंश्रयस्वं
विरायसर्वैर्द्वंद्वैर्मोक्षमान्विच्छमानः॥नमातानापिताकश्चित्कस्यचित्प्रतिपद्यते॥दानमध्यय
नंजंतुस्वकर्मफलमश्नुते॥स्वकर्मफलनिक्षेपूयंविधानाविधिनिर्मितं॥भूतग्राममिमंकालः
समंतादपिकर्षति॥हातानहाचकालेनिक्रंदमानोमुहुर्मुहुः॥मंडूकइवसर्पेणग्रसुमाग्रस्यते
नरः॥पंडितेचैवमूर्खेचबलवत्यपिदुर्बले॥ईश्वरेचदरिद्रेचमृत्योःसर्वत्रतुल्यता॥जराम
सुहितरतानांस्वादितारोचकादिव॥वालिनांदुर्बलानांच॥कृच्छ्रानांमहतामपि॥नकश्चिद्ज्ञा
तातिकामेजराम्रत्युंचमानवः॥अपिसागरपर्यंतांविविक्ष्यवसुधाधरान्॥मृत्युंनैवाजितेप्पंतकः ५७

पुमान्बुद्धिमान्भवेत्॥व्यतपोह्यथनास्यंतंपक्षयोःशुक्लपक्षयोः॥जातंमृत्युर्जरयातीनिमेषंनातिवर्त
ते॥निमेषादशचाष्टौचकाष्ठात्रिंशत्तुताःकला॥त्रिंशत्कलामुहूर्तस्यात्रिंशाद्भिस्तैरहर्निशं॥निमे
षादिरयंकालःशीघ्रत्वात्सर्वदेहिनां॥हरत्यायुर्द्विजश्रेष्ठनदीवेगइवद्रुवं॥निमेषमात्रमपिते
वयोगच्छन्नतिष्ठति॥तस्माद्देहोह्यनित्येषुयान्नित्यंतत्समाचर॥अनित्येसतिमानुष्येविद्यास्मु
रणंचके॥परमंतेनमस्तोष्यःसाहसांकिमतःपरं॥किमतःपरमन्यंतेकथयामिपुनःपुनः॥
अनित्यंसर्वमेवैतद्यत्किंचिद्दृश्यते॥नदीवश्चेगतिज्ञात्वासर्वभावेष्वनित्यतां॥सर्वारं
भान्परित्यज्यभाविष्यामास्यपोगवित्॥आत्मज्ञानमधीयानोप्यजन्नात्मानमात्मन॥
आत्मनाहंभाविष्यामिनमांतरयतेजना॥पश्चयद्वैःकथंहिंस्रैरीदृशंवक्रमहासि॥अंत
वाड्भिःह्रलमज्ञःक्षुद्रयज्ञैःपिशाचवत्॥सोहंस्वाहिंस्त्रःसत्यात्माकामक्रोधविवर्जितः॥जि

इति. तेंद्रियःसमोभूत्वामत्युंजेष्याम्यमर्त्यवत्॥अंतर्बहिश्चयत्किंचिन्मनोव्यासंगकारणं॥तत्सर्वंसंपरि
५८ त्यज्यध्यानेधारयेन्मनःसदा॥मनसश्चेंद्रियाणांचह्यैकाग्र्यंसमाहितः॥तावत्स्थास्यामिनियतो
यावत्तत्क्षणमागतं॥विमुक्तविषयासंगंसन्निरुध्यमनोहृदि॥प्रशांतात्मामुनीभावंततोनिर्वाण
मृच्छति॥कामक्रोधमयेनैवमनसाकृतचेतसः॥पिशुनाश्चकृतघ्नाश्चनास्तिकाभिन्नवृत्तयः
॥एतन्मर्दानपश्यंतिमोक्षद्वारमपावृतं॥अश्वमेधसहस्राणिवाजपेयशतानिच॥ध्यान
यज्ञस्यसर्वाणिकलांनार्हंतिषोडशीं॥ ॥भीष्मउवाच॥ ॥पुत्रस्यैतद्वचःश्रुत्वामोक्षधर्म
विदस्तदा॥तथासकृतवान्विप्रोयथैतद्वदत्सुतः॥एवंसुमेधाविवचःसत्वोद्रिक्तःशरीरम
प्यात्महारींविचिंतयत्॥तथैवसर्वार्थविरक्तिमागतोद्विजोत्तमःसर्वसुखेषुनिस्पृहः॥सशं ५८
खचक्रंरविमंडलेस्थितंकुशेशयाक्रांतमनंतमच्युतं॥जगामबुध्याकमनीयरूपिणंहि

जोत्तमश्चित्रविभूषणोज्वलं॥ ॥इतिश्रीइतिहाससमुच्चयेपितापुत्रसंवादोनामाष्टादशो
ध्यायः॥ ॥ ॥युधिष्ठिरः॥ ॥कथंनिर्वेदमापन्नःशुकोवैयासकिःपुरा॥एतन्मेपृच्छतःसर्वं
समाचक्ष्वपितामह॥ ॥भीष्मः॥ ॥प्रकृतेनेस्वकृतेनवरंतमकुतोभयं॥आध्याध्यकृच्छ्रस्था
ध्यायंपुत्रंव्यासोवदत्तदा॥ ॥व्यासउवाच॥ ॥धर्मंपुत्रनिषेवस्वमुनीहृष्णेवाहिमातपौ॥क्षुत्पि
पासेवकोपंचजाहिनित्यंजितेंद्रियः॥धर्माद्पेतंयत्कर्मयद्यपिस्यान्महाफळं॥नतत्सेवेतमेधावी
नाहितंहितमच्युतं॥एकएवसुहृद्धर्मोनिधनेप्यनुयातियः॥शरीरेणसमंनाशंसर्वमन्यत्तुगच्छ
ति॥नपुत्राहिसहायार्थपितामातावतिष्ठति॥नपुत्रदारानज्ञातिर्धर्मस्तिष्ठतिकेवळं॥धर्मं
हिपोष्यःप्रयंतितादृग्मोहान्वितानराः॥अपथागच्छतांतेषांमनुयातोविनश्यति॥शक्तिमा
नप्यशक्तोसौधनवानपिनिर्धनः॥श्रुतवानपिमूर्खश्चयोधर्मविमुखोनरः॥पुलकाइवधा
न्येषुमक्षिकाइवपक्षिषु॥मशकाइवमर्त्येषुयेषांधर्मोनकारणं॥धर्मोमातापिताचैवधर्मोबं

पुः सुहृत्तथा॥ धर्मो माता सखा चैव धर्मः स्वामी परंतप॥ धर्मः स्वर्गस्य सोपानं धर्मात्स्वर्गमवा-
प्नुयात्॥ धर्मं चिंतयमानोपि पापाद्प्राणैर्विमुच्यते॥ ततः स्वर्गमवाप्नोति धर्मस्यैतत्फलं विदुः॥
यस्तु विष्णुपरो धर्मो यो वा नारायणे रतिः॥ येन विष्णुरमेयात्मा प्रसादमधिगच्छति॥ सर्व एव
परो धर्मः स्वर्गमोक्षपरायणः॥ तेन सर्वमिदं सर्वं पुत्र धार्यते सचराचरं॥ संचिंतितश्चाप्युपसे-
वितश्च दृष्टः स्तुतः संकथितश्च तोया॥ सर्वाणि पापान्यपहंति धर्मो निशातमांसीव सहस्र-
रश्मिः॥ तस्मात्सर्वात्मना धर्मं तात नित्यं समाचर॥ मा धर्मविमुखः प्रेत्य तमस्यंधे पतिष्यसि॥
ये संतुष्टाः कृतोपेताः सत्यार्जवदयापराः॥ जितेंद्रिया जितात्मानो नानसूयाश्च निह्नवः॥ अत्र धार्यस-
मं तेषां दांतानां धर्मचारिणां॥ नियच्छ परया बुद्ध्या मनउत्पथगामि यत्॥ मनो हि सर्वभूतानां संधि- ५९
नोति शुभाशुभं॥ अशुभेभ्यः सदाक्षिप्य शुभेष्वाव धारय॥ कामं क्रोधं भयं लोभं दंभद्रोहं मदं तथा॥
निद्रां मत्सरमालस्यं नास्तिक्यं च परित्यज॥ सत्यमार्जवमस्तेयं आनृशंस्यं परंतप॥ ब्रह्मचर्यमहिंसां

च त्वममेवानुपालय॥ सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभं॥ तथात्मानं समाधत्स्व
भ्रश्यसे न पुनर्यथा॥ क्रोधलोभपरो नित्यं निद्रालस्यपरस्तथा॥ विषयेच्छापरश्चैव श्रेय-
सो भ्रश्यते द्विजः॥ यथा यथा निषेवंते विषयान्विषयात्मकः॥ तथा तथा कुशलतो तेषां तेषूपजा-
यते॥ ते मूढा ह्यरिभिर्नित्यं विषयैर्हृतचेतसः॥ सप्राप्नुवंति दुःखानि तिर्यक्भूतास्तु योनिषु॥
विषयेषु प्रसक्तो हि नरः श्रेयो न विंदति॥ तस्मात्सर्वात्मना पुत्र विषयान्संपरित्यज॥ जन्मांत-
रशतान्सक्ता विषयेषु मतिर्नृणां॥ दृष्टा गौरी वसस्येभ्यो दुःखेनापि न वार्यते॥ निर्वर्त्य विषयास-
क्तिमिंद्रियाणां प्रमाथिनं॥ देवतातिथिपित्र्यशेषेण यात्रां देहस्य पालय॥ महान्प्रदर्शितः पंथा एष ध-
र्मः सपुत्रक॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थोपि भिक्षुकः॥ यथोक्तकारिणः सर्वे गच्छंति परमं
पदं॥ ऋजुस्तपस्वी संतुष्टः शमः सत्यो जितेंद्रियः॥ दाता दांतदयावांश्च ब्राह्मणो नावसीदति॥ अ-
प्रमत्तो प्रज्ञानेन नैवान्येन कुवर्त्मना॥ इहैव नरकं प्राप्नोति किंत्सां न करोति यः॥ गत्वा निरोध ध-

देशांसनुजनः किं करिष्यति॥ पारुष्यं अनृतं हिंसां परस्वं परयोषितः॥ पैशून्यं लोकवार्त्ता
वण्यपाभित्या ववर्जय॥ यया न साध्यते धर्मः या ते कार्यैर्न दृश्यते॥ न तां वाचं वदेत्प्राज्ञः परलो
कविरोधिनीं॥ परलोकहितं नित्यं अभ्यदुष्टायाचिंतय॥ अत्रैव कर्मणामेवाक्षिप्ता कं परिचिंतय॥
ब्राह्मणस्य तु देहोयं नोपभोगाय जायते॥ इह क्लेशाय महते प्रेत्यानंत्यसुखाय च॥ अत्रास्ता
निनिषेवस्व सत्कर्माणि प्रयत्नतः॥ एतावद्धर्मसर्वस्वं निंदितानि विवर्जय॥ ऊर्ध्वबाहुर्विरौम्ये
वन न कश्चिच्छृणोति मे॥ धर्मार्थश्चैव कामश्च स किमर्थं न साध्यते॥ पूर्ववयसि यो धर्मं न करो
ति विमूढधीः॥ स पश्चात्तप्यते लुप्तः भ्रष्टः सार्थादिवाध्वगः॥ ग्रामे वा नगरे वापि तीर्थे वा पत्तने
पि वा॥ न पुत्र तत्र वस्तव्यं यत्राधर्मपरो जनाः॥ अप्रमत्तेन सततं धर्मः कार्यो विजानता॥ सह
सा मरणे प्राप्ते धर्मः कर्तुं न शक्यते॥ अद्यैव त्वं कुरु श्रेयो मा ते कालोऽत्यगादयं॥ अकृतेष्वेव का ६०
र्येषु मृत्युर्वै संप्रकर्षति॥ जरामृत्युं च व्याधिं च को विज्ञानेत्सनातनः॥ स्वस्थस्तिष्ठेन्निषीदेद्वा स्व

स्वपेद्वा किंपुनर्हसेत्॥ जन्मव्याधिजरादुःखैर्वेदनाभिर्भृतं जगत्॥ असारमिव संसारं त्यजेत्तं पुत्रका
ध्रुवं॥ अस्मच्छायानुवर्त्तिते ज्ञातिसंबंधिबांधवाः॥ येन तेसह गंतव्यं तं धर्मं सुकृतं कुरु॥ भूतजीवितम
त्यल्पं निद्रा तस्यार्धहारिणी॥ बाल्यशोकजरारोगैर्योगैरर्धं तपर्दिनिःष्फलं॥ स्त्रीयंते जन्मलाभाय जायंते ६१
मरणाय च॥ स्वधर्माय न मोक्षाय प्राकृतस्तु यथा जनाः॥ तुल्यजातिवयोरूपानहतान्पश्यतः समं तु ना
न च नामास्ति ते त्रासो लोहं तु हृदयं न वा॥ शतस्यापि समेतस्य शतपूर्यं न विद्यते॥ आशामात्रभिदं पुंसां
षष्ठिरेवा पुरुत्तमं॥ तोयफेनोपमे देहे जीवे शकुनिवस्थिते॥ अनित्यप्रियसंवासे कथं स्वपसि पुत्रक॥
आहतेहितबुद्धिस्त्वं अध्रुवध्रुवसंज्ञकः॥ अनर्थं यार्थविज्ञानं स्वमर्थं नाव बुध्यसे॥ पुत्रदारकुटुंबानि
शरीरं संचयानि च॥ पारक्यमध्रुवं सर्वं किं स्वं सुकृतदुष्कृते॥ दुःखदुःखानि भूतानि म जरो जरमत्य
सो॥ आदित्योऽभ्यस्तमभ्येति पुनः पुनरुदेति च॥ तल्लासूर्यविनिर्भिन्नं सिक्तं विषयसर्पिषा॥ रागद्वे
षादिना पक्वं मृत्युरश्नाति मानुषं॥ महोति दिनरत्नं ज्ञानिपतंत्य प्रतएव ते॥ आयुर्विच्छिद्यमानानि मृत्यु

नात्किंनपश्यसि॥ बहुकृत्येनिरुद्धोगेनागतोव्येप्रसुप्तकः॥ विश्वस्तःकोभयस्थानेहापुत्रकविक-
ल्पसे॥ अविश्राम्यमनात्लंबमपाथेयमदैशिकं॥ तमःकांतारमध्वानंकथमेकोगमिष्यसि॥ सतस्मा
धारस्तपस्तैलंदयावर्तिःक्षमाशिखा॥ अंधकारेप्रवेष्टव्येदीपोयत्नेनधार्यते॥ यथासार्थपरित्य-
ज्यगंतव्यमवनौनते॥ तत्कथंधृतिमाप्नोतिमृगःपाशैरिवावृतः॥ मृत्युर्जराचरोगश्चदुःखानिविविधा
निच॥ अनुषक्तानितेदेहेस्वस्थःकिमनुतिष्ठसि॥ तिष्ठंतंचव्रजंतंचमृत्युरन्वेतिदेहिनं॥ निवृत्तिंलभते
कस्माद्यथामीनोजलौघृतः॥ जरादृरीतपंथानंप्रचंडव्याधिसैनिकं॥ मृत्युद्रांतंपरिध्वांतमायांतं
६ किंनपश्यसि॥ यतस्त्वमपियास्यंतंनकश्चित्पैनुयास्यसि॥ एकाकीनावगंतव्यंस्वमादायशुभाशुभं॥
शुभाशुभंसमादायजंतुरन्यत्रगच्छति॥ अन्यत्रैवगच्छंतंसुहृत्संबंधिबांधवाः॥ नेनंसुहृत्समुपया
तिनवंधुवर्गोनार्थाप्रपत्लरवितानवदारपुत्राः॥ तास्मिन्क्षणेप्रियदातानिविवर्जयित्वाप्राप्तःस्वकर्म
फलप्रपद्यप्सुजःप्रयाति॥ मातापितृसहस्राणिपुत्रदारशतानिच॥ अनेकशोचितव्यानिकस्यत्वंना ६१
पिकस्यवा॥ नतेषांभवताकार्यंभवतस्तैर्नते॥ स्वकृतैरपिजातानित्वमप्येकोगमिष्यसि॥ वर्षास्वेतत्क-

रिष्यामिग्रीष्महेमंतयोरपि॥ इत्येवंचिंतयन्मूढोनांतरायाणिपश्यति॥ पश्यन्नपिप्रस्खल-
तिमृएवनपिनबुध्यसे॥ शठेस्त्वमिंद्रियैरेभिर्बाहुमाननपिबध्यसे॥ महाजालसमाकृष्टान्पश्यन्
जंतून्सुदुःखितान्॥ निबंधनीरज्जुरेषायाग्रामेवसतोरतिः॥ छित्वैनांसुकृतीयानिनेनांछिंदंतिदु
ष्कृती॥ अहिंसासत्यसंतोषऋजुत्वंश्रीतपोमयी॥ नावमारुह्ययत्नेनसंसारार्णवमुत्तर॥ प्रपास्य
तांकिमास्यंतेसमुच्छितेमहद्भये॥ अतिक्रमयदारुणंनपोमहत्तमावर॥ नपुत्रदारबंधुर्वानसंग
तःप्रियोजनः॥ अनुव्रजंतसंकटेव्रजंतमेकपादिनं॥ यदेवकर्मकेवलंस्वयंकृतंशुभाशुभं॥ तदेवपु-
त्रसार्थिकंभवेत्तुत्तस्यगच्छतः॥ वयोगतंजराकृतंशिरोरुहेषुशुभ्रता॥ करःशिरश्चकंपतेनजीवसी
तिभाषसे॥ नतस्यसंविभज्यतेस्वकर्मणापरस्परं॥ यथाकृतंशुभाशुभंस्वमेवतत्रभुज्यते॥ यदात्वे
मेवपश्चतस्त्वमग्रतोभविष्यसि॥ तदागतिंगमिष्यतिकिमात्मजैःपरेणवा॥ यथावदृश्यतेमहा
जनस्यपावकः॥ अपकएवपच्यतेपुराप्रमीयतेनरः॥ गतंद्विरष्टवर्षकंकुवोसिपंचविंशकः॥ कुरुष्व
धर्मसंचयंवयोहितेप्रवर्धते॥ अयंजराकलेवरंविजर्जरीकरोतिते॥ बलंगतंपनाशिनीनियच्छ

सोकृतं धनं॥ धनस्य यस्य राजतो भयं यस्य नास्ति चोरतः॥ मृतं च यन्न मुंचति तमार्जयस्व तद्धनं।
सहस्रशोपि पुत्रक ब्रवीमि तत्तदेव ते॥ अशाश्वतं हि जीवितं कुरुष्व धर्ममादृतः॥ नास्ति धर्म
समो बंधु नास्ति धर्मसमः सुहृत्॥ नास्ति धर्मसमो लोके नास्ति धर्मसमा गतिः॥ मावृते ना
स्ति तस्मात धर्मकार्यपरो भव॥ मीठी बद्धोपि हि स्त्राम्यथा सग्रासं न घासगोः॥ पनृयन्नेवाग्रतो
मृत्युं याधर्मि नाचरे परः॥ अजागलस्तनस्येव तस्य जन्मा निरर्थकं॥ एकस्मिन्नप्यतिक्रांते दिने ध
र्मविवर्जिते॥ दस्युभिर्मुषिते नेव युक्तमाक्रंदितां चिरं॥ प्रायशः क्षीणपापस्य नित्यं धर्मपरस्य
च॥ नरस्योत्पद्यते ज्ञानं ज्ञानान्मोक्षं च विंदति॥ कर्मणा मनसा वाचा यो धर्मे निरतो नरः॥ अफ
लाकांक्षिणस्तस्य स मोक्षमधिगच्छति॥ ॥शुकः॥ ॥श्रुतामे विविधा धर्माः प्राणिनां चापि
नित्यता॥ सांप्रतं मोक्षतत्वार्थं भगवन्वक्तुमर्हसि॥ ॥व्यासः॥ ॥ नान्यत्र विद्यातपसो नान्य ६२
त्रेंद्रियनिग्रहात्॥ नान्यत्र सर्वसंन्यासा मोक्षं विंदति मानवः॥ नपो विद्या च विप्रस्य निश्रेय